लघुग्रन्थरत्नप्रभावलिः

१

प्रत्याख्यानसंग्रहः

श्रीनागोजीभट्टप्रणीतः

सम्पादकौ—पं० सूर्यनारायणशुक्ल-फडकेऽनन्तशास्त्रिणौ

ऋलृक् ॥ ऋलृक्सूत्रे लृकारः प्रत्याख्यातः पाठ एव ज्यायानिति भाष्ये ।

ञमङणनम् ॥ इत्यत्र योगविभागो मकारश्च प्रत्याख्यातः, तस्माददृष्टार्थ एव स इति तत्तात्पर्यम् ।

न धातुलोप आर्धधातुके ॥१।१।४॥ अनारम्भो वेत्येतत्प्रत्याख्यातम् ।

दीधीवेवीटाम् ॥१।१।६॥ दीधीवेव्योश्छन्दोविषयत्वाद् दृष्टानुविधित्वाच्च छन्दसः, अदीधेदर्दीधयुरिति च गुणदर्शनादप्रतिषेध इति दीधीवेवीग्रहणं प्रत्याख्यातम् । इड्ग्रहणप्रत्याख्यानं त्वेकदेशिनः साप्तमभाष्यविरोधात् ।

मुखनासिकावचनोऽनुनासिकः ॥१।१।८॥ प्रासादवासिन्यायेनात्र मुखग्रहणं प्रत्याख्यातम् ।

नाज्झलौ ॥१।१।१०॥ सिद्धमनच्त्वादितीदं प्रत्याख्यातं फलतः ।

आद्यन्तवदेकस्मिन् ॥१।१।२१॥ व्यपदेशिवद्भावेनेदं प्रत्याख्यातम् । सोऽप्यवचनाल्लोकविज्ञानात्सिद्धमिति प्रत्याख्यातः ।

बहुगणवतुडतिसंख्या ॥१।१।२३॥ बहुगणवत्विदं सूत्रं ज्ञापकैः खण्डितमेकदेशिना ।

विभाषा दिक्समासे बहुव्रीहौ ॥१।१।२८॥ अत्र बहुव्रीहावित्येतल्लक्षणप्रतिपदोक्तपरिभाषया प्रत्याख्यातम् ।

न बहुव्रीहौ ॥१।१।२९॥ अकच्स्वरौ तु कर्तव्यौ प्रत्यङ्गं मुक्तसंशयावित्यनेन प्रत्याख्यातमिदम् । भूतपूर्वस्योपसंख्यानमित्यपि प्रत्याख्यातम्, व्यवस्थानवगमात् ।

अन्तरं बहिर्योगोपसंव्यानयोः ॥१।१।३६॥ अत्र बहिर्योगेन सिद्धिमाश्रित्योपसंव्यानग्रहणं प्रत्याख्यातम् ।

विभाषा द्वितीयातृतीयाभ्याम् ॥ (७।३।११५॥) तीयस्य ङित्सूपसंख्यानाद्विभाषा द्वितीयातृतीयाभ्यामिति प्रत्याख्यातम्[1] । संज्ञोपसर्जनीभूतास्तु न सर्वादयः । महासंज्ञाश्रयणेन सर्वनामाव्ययसंज्ञयोः संज्ञोपसर्जनप्रतिषेधः प्रत्याख्यातः ।

अव्ययीभावश्च ॥१।१।४१॥ इदं प्रत्याख्यातमित्येके ।

न वेति विभाषा ॥१।१।४४॥ अशिष्यो वा विदितत्वादित्यनेनेदं प्रत्याख्यातम् ।

---

१ इदं साप्तमं सूत्रमत्र भाष्यकारेण प्रसङ्गतः प्रत्याख्याततवादत्र संगृहीतम् ।

एच इग्घ्रस्वादेशे ॥१।१।४८॥ सिद्धमेङः सस्थानत्वादेचोश्चोत्तरभूयस्त्वादिति प्रत्याख्यातमिदम्।

षष्ठी स्थानेयोगा ॥१।१।४९॥ प्रसिद्धार्थकमिदं सूत्रम्, शब्दस्य शब्देन स्थानातिरिक्तसम्बन्धाभावात्, सत्त्वऽपि व्याख्यानत इति न्यायात्प्रत्याख्यातम्।

स्थानेऽन्तरतमः ॥१।१।५०॥ इदमशिष्यं स्वभावसिद्धत्वादिति प्रत्याख्यातम्। दीर्घंपुयणाद्यनापत्या सप्तम्यन्तपाठश्च प्रत्याख्यातः।

स्थानिवदादेशोऽनल्विधौ ॥१।१।५६॥ लोकतः सिद्धेर्युष्मदस्मदोरनादेश इति ज्ञापकेन च सिद्धेरिदं प्रत्याख्यातम्। अदो जग्धिर्ल्यप्ति कितीति ल्यप्ग्रहणाज्ज्ञापकादनल्विधावित्यपि प्रत्याख्यातम्। मन्दबुद्ध्यर्थन्त्वारम्भः।

प्रत्ययस्य लुक्श्लुलुपः ॥१।१।६१ **प्रत्ययलोपे प्रत्ययलक्षणम्** ॥ १।१।६२ ॥ अन्यतरप्रत्ययग्रहणं भाष्ये प्रत्याख्यातम्।

न लुमताङ्गस्य ॥१।१।६३॥ उत्तरपदत्वे चापदादिविधाविति वार्तिकं यस्मात्प्रत्ययविधिस्तदादीत्यस्य सुप्तिङन्तमित्यस्य चोत्तरत्रानुवृत्तिमाश्रित्य स्वादिष्वसर्वनामस्थाने यचीति योगविभागमाश्रित्यासमर्थसमासेन प्रसज्यप्रतिषेधमाश्रित्य यजादौ सर्वनामस्थाने पदत्वनिषेधेन प्रत्याख्यातम्। भमित्यत्रासर्वनामस्थाने इति पर्युदास एव। पदादादिरिति पञ्चमीसमासेनापदादिविधावित्यपि प्रत्याख्यातम्। सात्प्रतिषेधाच्च ज्ञापकात्स्वादिपरत्वेन येषां पदत्वं न तेभ्यः प्रतिषेध इति ऋक्ष्वित्यादौ न दोषः। बहुसेचावित्याद्यर्थम्, बहुच्पूर्वस्य पदादिविधावेव न पदान्तविधाविति वक्तव्यम्। द्वन्द्वेऽन्त्यस्येति वक्तव्यम्, वाक्स्रक्त्वचमित्युक्तम्। एवं चेदं प्रत्याख्यानमेकदेशिनः।

अलोऽन्त्यात् पूर्व उपधा ॥१।१।६५॥ नानर्थकेऽलोऽन्त्यविधिरिति परिभाषा प्रत्याख्याता। नाम्रेडितस्यान्त्यस्य तु वेति ज्ञापकादतोऽन्त्यस्य न पररूपम्। घसोरेद्धावितिलोपः शित्वान्नान्त्यस्य। अत एव लोपाद्धलि लोपो नान्त्यस्य। अत्र ग्रहणसामर्थ्यादत्र लोपोऽभ्यासस्येति नान्त्यस्य।

स्वं रूपं शब्दस्याशब्दसंज्ञा ॥१।१।६८॥ शब्दपूर्वकत्वादर्थप्रत्ययस्यार्थे कार्यासंभवाच्छब्दे च संभवादर्थस्य विशेष्यत्वनिवृत्तिरितीदं प्रत्याख्यातम्। शब्देऽर्थे च शब्दस्य शक्तिस्तु लोकत एव सिद्धा। ष्णान्ताः षडिति षान्तसंज्ञायाः षट्संज्ञाविधानाज्ज्ञापकान्न शब्दसंज्ञायां स्वरूपविधिः। मन्त्रे यजुषि ऋचीत्यादौ शब्दे कार्यासंभवादर्थगतिरित्यशब्दसंज्ञेत्यपि प्रत्याख्यातम्।

अणुदित्सवर्णस्य चाप्रत्ययः ॥१।१।६९॥ सवर्णेऽण्ग्रहणमपरिभाष्यमाकृतिग्रहणादित्यण्ग्रहणं प्रत्याख्यातम्। अप्रत्यय इति तु परसूत्रवज्जातिनिर्देशप्रयुक्तप्राप्तातिप्रसङ्गवारणाय।

आदिरन्त्येन सहेता ॥१।१।७१। आदिरन्त्येन सहेता गृह्यमाणः स्वस्य च रूपस्य ग्राहकस्तन्मध्यानां चेति वक्तव्यमिति वार्तिकं सम्बन्धिशब्दैर्वा तुल्यमिति प्रत्याख्यातम्।

येन विधिस्तदन्तस्य ॥१।१।७२॥ प्रकृते तदन्तविधिरिति वार्तिकं येनेति करणे तृतीयामाश्रित्य प्रत्याख्यातम्।

इन्धिभवतिभ्यां च ॥१।२।६॥ इन्धेश्छन्दो विषयत्वाद्भुवो वुको नित्यत्वात्ताभ्यां लिट्किद्वचनानर्थक्यमितीदं प्रत्याख्यातम् ।

मृडमृदगुधकुषक्लिशवदवसः क्त्वा ॥१।२।७॥ मृडादिभ्य एव सेटः क्त्वः कित्त्वमिति नियममाश्रित्य न क्त्वा सेडिति प्रत्याख्यातम् । गुधकुषक्लिशां ग्रहणं तु रल इति विकल्पे प्राप्ते नित्यार्थम् ।

न क्त्वा सेट् ॥१।२।१८॥ अत्र क्त्वाग्रहणं प्रत्याख्यातम् ।

पूङः क्त्वा च ॥१।२।२२॥ इत्यत्र योगविभागः कार्यः । आद्ये सेट् निष्ठेत्यनुवर्त्तते । उत्तरत्र सेडिति वर्तत इति पूङः क्त्वा च सेडिति निवर्त्यानेनानिटोरेव क्त्वानिष्ठयोः कित्त्वं वा, कित्त्वे इडभावोऽकित्त्वे इडितीड्विधौ पूङश्चेति प्रत्याख्यातम् । भारद्वाजीयास्तु विभाषयोर्मध्ये पाठान्नित्यमकित्त्वमिडाद्योः, क्त्वाग्रहणमुत्तरार्थम्, पूङश्चेतीड्विकल्पविधौ लाघवमनादृत्य सूत्रकृता कृतमिति ।

उच्चैरुदात्तः ॥१।२।२९॥ इत्यादि सूत्रत्रयम्, तस्यादित उदात्तमर्धह्रस्वम्॥ (१।२।३२॥) इति च प्रत्याख्यातम् । वेदाध्ययनकाले उपदेशेन ज्ञातत्वात् । अन्वाख्यानमेव तर्हीदं मन्दबुद्धेरिति भाष्यम् ।

प्रथमानिर्दिष्टं समास उपसर्जनम् ॥ १।२।४३ ॥ समासविधाने इति वक्तव्यमित्येतन्न वा तादर्थ्यात्ताच्छब्द्यमिति प्रत्याख्यातम् ।

अर्थवदधातुरप्रत्ययः प्रातिपदिकम् ॥१।२।४५॥ कृत्तद्धितग्रहणस्य नियमार्थत्वमाश्रित्याप्रत्ययग्रहणं प्रत्याख्यातम् । स च तदन्तप्रतिषेध इति भाष्यम् । वाक्यस्य प्रातिपदिकसंज्ञाप्रतिषेधो वक्तव्य इति वार्तिकं पृथक्प्रयोगार्हाणामर्थवत्समुदायानां समासग्रहणं नियमार्थमाश्रित्य प्रत्याख्यातम् । निपातस्यानर्थकस्य प्रातिपदिकसंज्ञेत्येतदधिपरो अनर्थकाविर्त्येतदनर्थकानामप्येषामर्थवत्कृतमित्यर्थज्ञापकमाश्रित्य प्रत्याख्यातम् ।

गोस्त्रियोरुपसर्जनस्य ॥१।२।४८॥ गोटाङिति वक्तव्यमिति वार्तिकं स्त्रीशब्दे स्वरितत्वप्रतिज्ञया प्रत्याख्यातम् । कपि प्रतिषेधो वक्तव्य इति वार्तिकं कपः समासार्थे वाक्ये प्रवृत्त्यान्तरङ्गतरत्वमाश्रित्य प्रत्याख्यातम् ।

लुक्तद्धितलुकि ॥१।२।४९॥ अवन्त्यादीनां प्रतिषेध इति उपसर्जनपदानुवृत्त्या प्रत्याख्यातम् ।

विशेषणानां चाजातेः ॥ १।२।५२ ॥ समानाधिकरणत्वाद्विशेषणानां युक्तवद्भावफलसिद्धेः, आविष्टलिङ्गा जातिर्यल्लिङ्गमुपादाय प्रवर्त्तते उत्पत्तिप्रभृत्याविनाशात्तल्लिङ्गं न जहातीति जातेस्तदभावसिद्धेः प्रसिद्धेऽर्थे प्रत्याख्यातम् । गुणवचनानामाश्रयतो लिङ्गवचनानीत्येतदर्थकं त्वित्युक्तम् ।

जात्याख्यायामेकस्मिन्बहुवचनमन्यतरस्याम् ॥ १।२।५८ ॥ यदा द्रव्याभिधानं तदा बहुवचनम्, सामान्याभिधाने चैकवचनसिद्धेरिदं प्रत्याख्यातम् ।

अस्मदो द्वयोश्च ॥ १।२।५९ ॥ इन्द्रियाणां स्वातन्त्र्येण विवक्षायां बहुवचनं पारतन्त्र्येण विवक्षायामितरे सिद्धे इतीदं प्रत्याख्यातम् ।

फल्गुनीप्रोष्ठपदानां च नक्षत्रे. ॥ १।२।६० ॥ तत्तन्नक्षत्रसमीपे चन्द्रे तत्तच्छब्दप्रवृत्तेरर्थानां बहुत्वाद्बहुवचनं तयोरेवाभिधाने द्विवचनमितीदं प्रत्याख्यातम् ।

छन्दसि पुनर्वस्वोरेकवचनम् ॥ १।२।६१॥ **विशाखयोश्च** ॥ १।२।६२ ॥ सुपां सुलुक्पूर्वसवर्ण इति सिद्धेमे प्रत्याख्याते ।

सरूपाणामेकशेष एकविभक्तौ ॥ १।२।६४ ॥ एकस्यापि लोकव्युत्पत्त्यानेकार्थत्वादिदं प्रत्याख्यातम् । यदप्यर्थावर्थौ प्रति अर्थानर्थान् प्रतीति च, तदपि प्रत्यर्थमेवेति । आकृत्यभिधानाद्वैकं विभक्तौ वाजप्यायन इति प्रकारान्तरेण प्रत्याख्यातम् । एतत्पक्षेऽधिकरणगतिः साहचर्यात् । अधिकरणं द्रव्यम् । द्रव्यार्थेषु च सामान्यात्सिद्धम् ।

वृद्धो यूना तल्लक्षणश्चेदेव विशेषः ॥ १।२।६५ ॥ असरूपाणां युवस्थविरस्त्रीपुंसानां विशेषस्याविवक्षितत्वात्सामान्यस्य च विवक्षितत्वात्सरूपाणामित्येव सिद्धमिति प्रत्याख्यातम् ।

नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्याम् ॥ १।२।६९ ॥ प्रधाने कार्यसंप्रत्ययान्नपुंसकस्यैव शेषो भविष्यति, आकृतिवाचित्वादेकवचनं द्रव्याभिधाने द्विवचनादि च सिद्धमिति प्रत्याख्यातम् । एकशेषविषयं भ्रात्रादीनां स्वस्राद्यर्थत्वमङ्गीकृत्य, **भ्रातृपुत्रौ स्वसृदुहितृभ्याम्** ॥ (१।२।६८) **पिता मात्रा** ॥ (१।२।७०॥) **श्वशुरः श्वश्र्वा** ॥ (॥१।२।७१॥) इति प्रत्याख्यातम् । **त्यदादीनि सर्वैर्नित्यम्** ॥ (१।२।७२) त्यदादीनां सामान्यार्थत्वात्सर्वैः सहोक्तौ तेषामेव शेष इतीदमपि प्रत्याख्यातम् । पूर्वशेषदर्शनाच्च परस्योभयवाचित्वाच्च । **ग्राम्यपशुसङ्घेष्वतरुणेषु स्त्री** ॥ (१।२।७३) इत्यपि प्रत्याख्यातम् । गाव उत्कालितपुंस्का वाहाय च विक्रयाय च स्त्रिय एवावशिष्यन्त इति द्वन्द्वस्य तेष्वनभिधानम् ।

भूवादयो धातवः ॥ १।३।१ ॥ समानशब्दानां प्रतिषेधो वक्तव्यः, इयानवधिर्धातुर्भवतीति वक्तव्यमिति क्रियावचनो धातुरित्याश्रित्य प्रत्याख्यातम् । सोपसर्गप्रत्ययप्रतिषेधो वक्तव्य इत्येतदन्वयव्यतिरेकाभ्यां धातोरेव क्रियावाचित्वात्प्रत्याख्यातम् । अस्त्यादीनां क्रियावाचित्वसाधनेनास्त्यादीनां धातुत्वं वक्तव्यमिति प्रत्याख्यातम् । शिश्ये इत्यादावभिधानतो यः प्रथमक्रियावाचीत्यर्थेन दोषो वारितः पाठाश्रयत्वं चाश्रित्य । अत एव प्रातिपदिकाणवयत्यादीनां न धातुत्वम् ।

उपदेशेऽजनुनासिक इत् ॥ १।३।२ ॥ उपदेशनेऽजनुनासिक इदिति वक्तव्यमिति वार्तिकं वाहुलकात्सूत्रे करणे घञमाश्रित्य प्रत्याख्यातम् ।

हलन्त्यम् ॥१।३।३॥ व्यवसितान्त्यो हलित्संज्ञ इति वक्तव्यमित्यन्त्यग्रहणसामर्थ्यात्प्रकर्षगत्याश्रयणेन प्रत्याख्यातम् । प्रातिपदिकान्त्यप्रतिषेधो वक्तव्य इतीत्कार्याभावादेव तद्वारणेन प्रत्याख्यातम् । इतरेतराश्रयपरिहाराय लश्चेति वक्तव्यमित्येतदेकशेषनिर्देशाद्वेति प्रत्याख्यातम् ।

न विभक्तौ तुस्माः ॥ १।३।४ ॥ अतद्धित इति वक्तव्यमिति थमो मस्येत्वपरित्राणार्थेनोकारानु-

वन्धेन न विभक्तौ तद्धिते प्रतिषेधज्ञापनमाश्रित्य प्रत्याख्यातम्। दानीम् यान्त इति न तत्र दोषः।

चुटू ॥१।३।७॥ चुञ्चुप्चणपोश्चस्य प्रतिषेधो वक्तव्य इति तयोर्लुप्तनिर्दिष्टयादित्वेन प्रत्याख्यातम्। इर उपसंख्यानं कर्त्तव्यमिति इरितो वेति ज्ञापकमाश्रित्य प्रत्याख्यातम्। यद्वा रेफ इत् हलन्त्यमिति इकारस्योपदेश इतीत्संज्ञा, नुम् तु न, उन्दुन्दिर्स्कन्दिरादीनां नुमनुपक्तानां पाठात्, अन्त इत्यनुवृत्त्या वा।

तस्य लोपः ॥ १।३।९ ॥ तस्य ग्रहणसामर्थ्यादयं सर्वादेशः। णल्क्त्वानिष्ठासूपसंख्यानमिति णलुत्तमो वेत्यादेर्णिद्ग्रहणेन वा गृह्यते, क्त्वा सेट् न किद्ग्रहणेन गृह्यते, निष्ठा सेट् न किद्ग्रहणेन गृह्यते इत्यर्थमाश्रित्य प्रत्याख्यातम्।

अनुदात्तङित आत्मनेपदम् ॥ १।३।१२ ॥ विकरणेभ्यः प्रतिषेधो वक्तव्य इति उपदेश इत्यनुवृत्त्या भूवादय इत्यतः पष्ठ्या विपरिणतस्य धातव इत्यस्यानुवृत्त्या वा प्रत्याख्यातम्।

कर्तरि कर्मव्यतिहारे ॥ १।३।१४ ॥ क्रियाव्यतिहार इति वक्तव्यमिति क्रियाया अपि संदर्शनप्रार्थनाध्यवसायैरीप्सिततमत्वात्कृत्रिमकर्मत्वात्कर्मग्रहणेन ग्रहणम्, कर्तरि व्यतिहार इत्येव सिद्धे कर्मग्रहणाच्च क्रियातिरिक्तकर्माग्रहणमाश्रित्य प्रत्याख्यातम्।

विपराभ्यां जेः ॥ १।३।१९॥ उपसर्गाभ्यामिति वक्तव्यमिति साहचर्याश्रयणेन प्रत्याख्यातम्।

आङो दोऽनास्यविहरणे ॥ १।३।२० ॥ अव्यसनक्रियस्येति वक्तव्यमिति विहरणग्रहणसामर्थ्येन तत्समानक्रियादपीत्यर्थमाश्रित्य प्रत्याख्यातम्।

अवाद्ग्रः ॥ १।३।५१ ॥ गिरतेरिति वक्तव्यमिति गृणातेरवपूर्वस्यानभिधानात्प्रत्याख्यातम्।

दाणश्च सा चेच्चतुर्थ्यर्थे ॥ १।३।५५ ॥ सहयुक्ते तृतीयां कर्मव्यतिहारे आत्मनेपदं चाश्रियेदं प्रत्याख्यातम्।

नानोर्ज्ञः ॥ १।३।५८ ॥ सकर्मकादिति वक्तव्यमित्यकर्मकस्य जानातेः पूर्ववत्सन इत्युत्तरेण सिद्धेः, अनन्तरस्येति न्यायेनाकर्मकादात्मनेपदविधाने प्रयोजनाभावात्, सकर्मकार्थस्य पूर्वसूत्रस्यानेन निषेधात् प्रत्याख्यातम्।

शदेः शितः ॥ १।३।६० ॥ शदेर्लङादीनामिति वक्तव्यमित्येतच्छित्प्रकृतेरित्यर्थेन शिद्विषयादित्यर्थेन च प्रत्याख्यातम्। न्यविशतेत्येतत्साधकमुपसर्गपूर्वस्याड्व्यवाये उपसंख्यानमित्येतन्नेरित्यादेर्विशेषणषष्ठीत्वमाश्रित्य प्रत्याख्यातम्। विपराभ्यामित्यादावपि पष्ठ्यर्थे पञ्चमीति तदाशयः।

पूर्ववत्सनः ॥ १।३।६२ ॥ पूर्ववत्प्रत्ययादिति वक्तव्यमित्येतदवयवलिङ्गेनाव्यभिचारिसमुदायविशेषकत्वमाश्रित्य प्रत्याख्यातम्।

भुजोऽनवने ॥ १।३।६६ ॥ अनवनकौटिल्ययोरित्येतत्संयोगवद्विप्रयोगस्यापि विशेषावगतिहेतुत्वेन प्रत्याख्यातम्। यस्य भुजेरवनमनवनं चार्थस्तस्य ग्रहणमिति।

णेरणौ यत्कर्म णौ चेत्स कर्तानाध्याने ॥ १।३।६७ ॥ अण्यन्तस्य यत्कर्म यदा ण्यन्तस्य तदेव कर्म तदात्मनेपदमित्येतदणौ यत्कर्म णौ चेदिति वाक्यं छित्वा प्रत्याख्यातम् । आत्मनः कर्मत्वे प्रतिषेध इत्येतन्न वा ण्यन्तेऽन्यस्य कर्तृत्वादिति प्रत्याख्यातम् ।

स्वरितञितः कर्त्रभिप्राये क्रियाफले ॥ १।३।७२ ॥ यातीत्यादिव्यावृत्तेस्तेषामकर्त्रभिप्रेत-क्रियाफलाभावात्सिद्धिमाश्रित्य स्वरितञित इत्यंशः प्रत्याख्यातः । कर्त्रभिप्राये इत्येतत्सामर्थ्येनोभयविध-क्रियाफलवत्स्वेव तत्प्रवृत्तेः ।

शेषात्कर्त्तरि परस्मैपदम् ॥ १।३।७८ ॥ शेषाच्छेषे इति वक्तव्यमित्येतत्कर्त्तरि कर्मेत्यतः कर्त्तरीत्यनुवर्त्य कर्त्तैव यः कर्त्तेत्यर्थेन प्रत्याख्यातम् ।

अनुपराभ्यां कृञः ॥ १।३।७९ ॥ अत्रात्मनेपदप्रतिषेधो वक्तव्य इत्येतत् द्युतादिभ्यो वा वचनात् परस्मैपदस्यात्मनेपदबाधकत्वेन च प्रत्याख्यातम् ।

अणावकर्मकाच्चित्तवत्कर्तृकात् ॥ १।३।८८ ॥ चुरादिणिचो ण्यन्तादिति वक्तव्यमित्येतद-णावित्यत्र यस्मात् णेः प्राक्कर्म कर्त्ता वा विद्यते तस्य णेर्ग्रहणमित्याश्रित्य प्रत्याख्यातम् ।

लुटि च क्लृपः ॥ १।३।९३ ॥ अनुवृत्त्यर्थसर्वचकारप्रत्याख्यानमत्र । स्वरितत्वेनैव तत्सिद्धेः ।

आकडारादेका संज्ञा ॥ १।४।१ ॥ संज्ञाप्रकरणादेवैकेति संज्ञालाभेन संज्ञेति प्रत्याख्यातम् । प्राक्कडारात्परं कार्यमिति पाठः सिति चेति पदसंज्ञस्य भसंज्ञाप्राप्त्या प्रत्याख्यातः । घिसंज्ञायां शेषग्रहणं च, नदीसंज्ञाया ह्रस्वलक्षणत्वात् घिसंज्ञायां च गुणप्राप्तेस्तद्विषये घित्वाप्राप्तेः प्रत्याख्यातम् ।

विप्रतिषेधे परं कार्यम् ॥ १।४।२ ॥ अन्तरङ्गं बलीय इति वक्तव्यमित्येतदसिद्धं बहिरङ्गमि-त्यनया प्रत्याख्यातम् ।

यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम् ॥ १।४।१३ ॥ मित्सुटोरुपसंख्यानमित्येतन्नेदमदसो-रकोरित्येतज्ज्ञापितेन तदेकदेशभूतस्तद्ग्रहणेन गृह्यते इत्यनेन प्रत्याख्यातम् ।

कारके ॥ १।४।२३ ॥ कारकमिति संज्ञापक्षे संज्ञिनिर्देशः कर्त्तव्य इत्येतदन्वर्थसंज्ञया प्रत्याख्यातम् । अन्वर्थत्वेऽकर्त्तरि कर्तृशब्दानुपपत्तिः, सिद्धं तु प्रतिकारकं क्रियाभेदात् स्वस्वक्रिया-निरूपितं कर्तृत्वम् ।

ध्रुवमपायेऽपादानम् ॥ १।४।२४ ॥ जुगुप्साविरामेत्यादिर्बौद्धापायमाश्रित्य प्रत्याख्यातम् । गतियुक्तेष्वपादानत्वं वक्तव्यमिति अध्रौव्यस्याविवक्षितत्वात्प्रत्याख्यातम् ।

भीत्रार्थानां भयहेतुः ॥ १।४।२५ ॥ पराजेरसोढः ॥ १।४।२६ ॥ वारणार्थानामीप्सितः ॥ १।४।२७ ॥ अन्तर्द्धौ येनादर्शनमिच्छति ॥ १।४।२८ ॥ आख्यातोपयोगे ॥ १।४।२९ ॥ जनिकर्तुः प्रकृतिः ॥ १।४।३० ॥ भुवः प्रभवः ॥ १।४।३१ ॥

एतानि बौद्धापायमाश्रित्य प्रत्याख्यातानि । वारणार्थानामित्यत्र कर्मणो यदीप्सितमिति वक्तव्यमिति कर्तुरीप्सिततमं कर्मेत्येव सिद्धमिति प्रत्याख्यातम् ।

आख्यातोपयोगे ॥ १।४।२९॥ आख्यातुरनुपयोगे कारकत्वेऽपि दुहियाचीति परिगणनान्नाकथितं चेति कर्मत्वम् ।

कर्मणा यमभिप्रैति स सम्प्रदानम् ॥ १।४।३२ ॥ क्रियाग्रहणमपि कर्तव्यमिति क्रियाया अपि कृत्रिमकर्मत्वमाश्रित्य प्रत्याख्यातम् ।

उपान्वध्याङ्वसः ॥ १।४।४८ ॥ वसेरश्यर्थस्य प्रतिषेधो वक्तव्य इति ग्रामे वसंस्त्रिरात्रमुपवसतीत्यर्थेन प्रत्याख्यातम् ।

गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्ता स णौ ॥ १।४।५२ ॥ अकर्मकग्रहणे कालकर्मणामुपसंख्यानमित्यस्याकर्मकाणामित्युच्यते न च केचित्कालभावाध्वभिरकर्मकास्त एवं विज्ञास्यामः क्वचिद्येऽकर्मका इत्यादिना प्रत्याख्यानं कृतम् ।

स्वतन्त्रः कर्त्ता ॥ १।४।५४ ॥ हेतुमत्युपसंख्यानमस्वतन्त्रत्वादित्येतत्, न वा स्वातन्त्र्यादितरथा ह्यकुर्वत्यपि कारयतीति स्यादिति प्रत्याख्यातम् ।

तत्प्रयोजको हेतुश्च ॥ १।४।५५ ॥ स्वतन्त्रस्याप्रयोज्यत्वात्तत्प्रयोजकमित्यप्रसिद्धिः, उक्तं वा, न वा स्वातन्त्र्यादितरथेति । अपरमुक्तम्, न वा सामान्यकृतत्वाद्धेतुतो ह्यविशिष्टम्, स्वतन्त्रप्रयोजकत्वादप्रयोजक इति चेन्मुक्तसंशयेन तुल्यमिति ।

ऊर्यादिच्विडाचश्च ॥ १।४।६१ ॥ कृभ्वस्तियोग इत्येतत्क्रियायोग इत्यनुवृत्त्याऽन्यक्रिययोर्यादिच्विडाचां योगाभावेन च प्रत्याख्यातम् ।

साक्षात्प्रभृतीनि च ॥ १।४।७४॥ च्व्यन्तस्य प्रतिषेध इत्येतदस्त्वनेन विभाषा, पूर्वेण नित्यो भविष्यति, लवणीशब्दस्यापि लवणशब्दादेशे त्रैरूप्यस्य सिद्धेः प्रत्याख्यातम् ।

ते प्राग्धातोः ॥ १।४।८० ॥ अत्र संज्ञानियममाश्रित्य, छन्दसि परेऽपि ॥ (१।४।८१) व्यवहिताश्च (॥ १।४।८२) इति सूत्रद्वयम्, अनुकरणं चानितिपरम् ॥ (१।४।६२॥) इत्यत्रानिति परमिति च प्रत्याख्यातम् । ते प्राग्धातोरित्यपि विपरीतप्रयोगदर्शनात्प्रत्याख्यातम् । विपरीतप्रयोगादर्शने हि तस्यासाधुत्वबोधनार्थमेतत्स्यात् ।

अनुर्लक्षणे ॥ १।४।८४ ॥ एतद्वचनानर्थक्यं लक्षणेत्थमिति सामान्येन कृतत्वादित्येतद्धेत्वर्थं तु वचनमिति प्रत्याख्यातम् ।

आङ् मर्यादावचने ॥ १।४।८९ ॥ आङ्मर्यादाभिविध्योरिति वक्तव्यमित्येतन्मर्यादावचन इत्येव सिद्धम् । आकुमारं यशः पाणिनेरित्यस्यैवास्य यशसो मर्यादेत्यर्थात्प्रत्याख्यातम् ।

तिङस्त्रीणि त्रीणि प्रथममध्यमोत्तमाः ॥ १।४।१०१ ॥ आत्मने पदस्य चेति वक्तव्यं समसंख्यार्थमित्येतदेकशेषनिर्देशेन संज्ञा अपि पठितिति प्रत्याख्यातम् । कृतद्वन्द्वानां चैकशेषः, आनु-

पूर्व्येणेति वक्तव्यमित्यपि लोकतः सिद्ध्या प्रत्याख्यातम् । यथा विहव्यस्य द्वाभ्यां द्वाभ्यामृगभ्यामग्नि-रुपस्थेय इत्युच्यते, न चोच्यते आनुपूर्व्येणेति, आनुपूर्व्येण चोपस्थीयते ।

युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः ॥ १।४।१०५ ॥ युस्मदस्मदन्येषु प्रथमप्रतिषेधः शेषत्वादिति शेषपदस्योक्तरहितशेपसत्वे एव प्रयोगात्प्रत्याख्यातम् । यद्वा प्रथम उत्सर्गः तस्य युष्मदस्मदोर्मध्यमोत्तमावपवादौ ।

विरामोऽवसानम् ॥१।४।११०॥ उपरि यो विराम इति वक्तव्यमित्यारम्भपूर्वको मम विराम इति प्रत्याख्यातम् । यद्वा संहितावसानयोर्लोकविदितत्वात्सिद्धम् । कश्चित्कंचिदधीयानमाह शन्नोदेवीयकं संहितयाधीष्वेति, स तत्र परम् सन्निकर्षमधीते, अपर आह केनावस्यसीति, स आह, अकारेणेकारेणोकारेण वेति । एवं संज्ञाद्वयसूत्रे प्रत्याख्याते ।

इति प्रथमोऽध्यायः

समर्थः पदविधिः ॥ २।१।१ ॥ सविशेषणानां वृत्तिर्न वृत्तस्य वा विशेषणं न प्रयुज्यत इति वक्तव्यमगुरुपुत्रादीनामित्येतदगमकत्वादिति प्रत्याख्यातम् । देवदत्तस्य गुरुकुलमसूर्यपश्यानि मुखानी-त्यादि तु गमकत्वात्साधु । गमकत्वं बोधजनकत्वम् । गुरुकुलापेक्षया तु नैषा षष्ठी । नियमतो देव-दत्तगुरोः पुत्र इत्यर्थस्यैवावगमात् । अतो मन्यामहे नैषा समुदायापेक्षा षष्ठीति भाष्यात् । किमोदनः शालीनामित्यादौ तदसंभवाच्च । अकिंचित्कुर्वाणमित्याद्यसाध्वेव, शिष्टैरप्रयोगात् । एकार्थीभावे वृत्तिर्व्यपे-क्षायां वाक्यस्य सिद्धत्वात्, विभाषा ॥ (२।१।११) अधिकारः प्रत्याख्यातः। समानाधिकरणेषूपसंख्यान-मधात्वभिहितसमानाधिकरणस्यासमर्थवत्वादित्येतन्न वा समानमध्यमध्यमेति वचनप्रामाण्यात्प्रत्याख्यातम्। निष्कौशाम्बिरित्यादिलुप्ताख्यातेषूपसंख्यानमिति निसादिभिस्तदर्थगतेर्वेति प्रत्याख्यातम् । इदं व्यपेक्षावादे द्वयम् । सुसूक्ष्मजटकेशेनेत्यादौ त्रिपदे बहुव्रीहौ विशेषणं विशेष्येणेति तत्पुरुषो न, बहुलवचनात् ।

सुबामन्त्रिते पराङ्गवत्स्वरे ॥ २।१।२ ॥ प्रातिपदिकस्थायाः सुपो लुग्विधानात् स्वरे इति प्रत्याख्यातम् ।

प्राक्कडारात्समासः ॥ २।१।३ ॥ प्राग्वचनं प्रतिसूत्रं समाससंज्ञाया अनिवृत्त्यर्थम् ।[१]

अव्ययीभावः ॥ २।१।५ ॥ अनव्ययमव्ययं भवतीत्यर्थकमहासंज्ञयाऽव्ययीभावोऽव्ययमित्ये-तत्प्रत्याख्यातम् ।

आङ् मर्यादाभिविध्योः ॥ २।१।१३ ॥ आङा कर्मप्रवचनीयेनैव योगे पञ्चमी । एतयोरेव चार्थयोराङ् तत्संज्ञ इति मर्यादाभिविधिग्रहणं प्रत्याख्यातम् ।

---

१ प्रत्याख्यानसंग्रहे स्थापने प्रयोजनं चिन्त्यम् ।

तृतीया तत्कृतार्थेन गुणवचनेन ॥२।१।३०॥ तृतीया तत्कृतेन गुणवचनेन अर्थशब्देन च समस्यते इत्यर्थमाश्रित्य, पूर्वसदृशसमोनार्थकलहनिपुणमिश्रश्लक्ष्णैः ॥ (२।१।३१॥) इति सूत्रस्थमर्थग्रहणं प्रत्याख्यातम् । तत्र सदृशग्रहणं च प्रत्याख्यातम् । सदृशप्रतिरूपयोः सादृश्ये ॥ (६।२।११॥) इति सूत्रे सादृश्यग्रहणमनर्थकं तृतीयासमासवचनात् । षष्ठ्यर्थमिति चेत्तृतीयासमासवचनानर्थक्यमिति ।

कर्तृकरणे कृता बहुलम् ॥२।१।३२॥ क्तेनेति वक्तव्यमिति बहुलवचनेन प्रत्याख्यातम् ।

अन्नेन व्यञ्जनम् ॥ २।१।३४ ॥ भक्ष्येण मिश्रीकरणम् ॥ २।१।३५ ॥ क्तान्तस्तृतीयान्तपूर्वपदः समानाधिकरणः सुपा समस्यते, उत्तरपदलोपश्च वक्तव्यः । षष्ठीसमासश्च युक्तपूर्णान्तः समानाधिकरणेन सुपा समस्यत इति वाच्यम् । इति द्वयं प्रत्याख्यातम् । न वाऽसमासेऽदर्शनात्, युक्तार्थसंप्रत्ययाच्च सामर्थ्यम् , संप्रत्ययाच्च तदर्थाध्यवसानम्, संप्रतीयमानलोपे ह्यनवस्थेति ।

चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः॥२।१।३६॥ विकृतिः प्रकृत्येति वक्तव्यम् । अश्वघासादीनामुपसंख्यानम् । अर्थेन नित्यसमासो वक्तव्यः, सर्वलिङ्गता च वक्तव्येति । तत्र बलिरक्षितग्रहणाज्ज्ञापकादाद्यं प्रत्याख्यातम् । अश्वघासादयः षष्ठीसमासाः । यद्धि यदर्थं तत्तस्यापि भवतीति द्वितीयं प्रत्याख्यातम् । अर्थशब्देन समासः सूत्रेणैव, तादर्थ्यचतुर्थ्योक्तत्वादर्थशब्दाप्रयोगान्न वाक्यम्, समासस्तु वचनसामर्थ्यादिति नित्यता सिद्धा, लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्य ।

सप्तमी शौण्डैः ॥२।१।४०॥ शौण्डादिभिरिति वक्तव्यमिति बहुवचननिर्देशेन प्रत्याख्यातम् ।

कृत्यैर्ऋणे ॥ २।१।४३ ॥ कृत्यैर्नियोग इति वक्तव्यमिति ऋणग्रहणस्यावश्यकोपलक्षणत्वात्प्रत्याख्यातम् ।

तद्धितार्थोत्तरपदसमाहारे च ॥२।१।५१॥ द्वन्द्वतत्पुरुषयोरुत्तरपदे नित्यसमासवचनमित्यत्र नित्यग्रहणं प्रत्याख्यातम् । यदा वृत्तिपक्षस्तदा सर्वेषामेव वृत्तिः, यदाऽवृत्तिपक्षस्तदा सर्वेषामवृत्तिरिति ।

उपमानानि सामान्यवचनैः ॥२।१।५५॥ यत्र किंचित्सामान्यं कश्चिद्विशेषस्तत्रोपमानोपमेये भवत इति वक्तव्यमिति, एतद् मानं हि नामानिर्ज्ञातज्ञानार्थमुपादीयते तत्समीपे यन्नात्यन्ताय मिमीते तदुपमानं गौरिव गवय इत्यादीति प्रत्याख्यातम् । उपमानसमासे गुणवचनस्य विशेषभाक्त्वात्सामान्यवचनाप्रसिद्धिः । न वा, श्यामत्वस्योभयत्र भावात्तद्वाचकत्वाच्च शब्दस्य सामान्यवचनप्रसिद्धिः । एवं चोपमानोपमेययोरुभयोरपि श्यामत्वान्वयः, समानाधिकरणेनेत्युक्तेरभेदान्वयः ।

विशेषणं विशेष्येण बहुलम् ॥ २ । १ । ५७ ॥ विशेषणविशेष्ययोरुभयोर्विशेषणत्वादुभयोश्च विशेष्यत्वादुपसर्जनाप्रसिद्धिः । न वा, अन्यतरस्य प्रधानभावात्तद्विशेषकत्वाच्चापरस्योपसर्जनप्रसिद्धिः ।

पूर्वापरप्रथमचरमजघन्यसमानमध्यमध्यमवीराश्च ॥२।१।५८॥ बहुलवचनोत्तरमनुक्रमणमुदाहरणभूयस्त्वाय । लक्षणप्रपञ्चाभ्यां हि विधयः सुपरिगृहीता भवन्ति ।

क्तेन नञ्विशिष्टेनानञ् ॥२।१।६०॥ समानप्रकृतिग्रहणं कर्तव्यम् । अवधारणे वा विशिष्टशब्दः । नुडिडधिकेन तु समासो वक्तव्यः ।

वर्णो वर्णेन ॥२।१।६९ ॥ वर्णो वर्णेष्वनेते ॥ (६।२।३।) इति स्वरविधायके एकं वर्णग्रहणं प्रत्याख्यातम् । लक्षणप्रतिपदोक्तपरिभाषयाऽन्यत्र व्यावृत्तेः ।

कर्मणि च ॥ २।२।१४ ॥ उभयप्राप्तौ कर्मणि षष्ठ्याः प्रतिषेध इत्येतदित्यर्थेऽयं चः पठितः इति प्रत्याख्यातम् ।

कुगतिप्रादयः ॥२।२।१८ ॥ कर्मप्रवचनीयानां प्रतिषेधो वक्तव्यः । व्यवेतानां च प्रतिषेधो वक्तव्यः, इत्येतदुभयम्, सिद्धं तु क्वाङ्स्वतिदुर्गतिवचनादित्यादिना प्रत्याख्यातम् ।

उपपदमतिङ् ॥२।२।१९॥ षष्ठीसमासादुपपदसमासो विप्रतिषेधेनेत्येतत् षष्ठीसमासस्याभावादुपपदसमासो भविष्यति, गतिकारकोपपदानामिति समासवचनात् । अथवा विभाषा षष्ठीसमासः, यदा न षष्ठीसमासस्तदोपपदसमासो भविष्यतीति द्वेधा प्रत्याख्यातम् ।

अनेकमन्यपदार्थे ॥ २।२।२४ ॥ एकविभक्ति चेत्यस्यैकग्रहणसामर्थ्याद्यत्र विग्रहे एकविभक्तिकानेकविभक्तिकयोः सत्ता तत्रैवैकविभक्तिकस्योपसर्जनत्वमिति । अत्र समानाधिकरणानामिति वक्तव्यमित्यनभिधानादिति प्रत्याख्यातम् ।

संख्ययाव्ययासन्नादूराधिकसंख्याः संख्येये ॥२।२।२५ ॥ द्विर्दश द्विर्दशा इत्यादौ वाक्ये एव सुच् न समासे, समासेनाभिहितः सुजर्थ इति भाष्यम् । अशिष्यः संख्योत्तरपदः संख्येयवार्थाभिधायित्वाद्, अन्यपदार्थ इत्येव सिद्धेः । अधिकदशा इत्यर्थं तु तत्र नियोगतः संख्या संख्येय एव वर्त्तते । प्रथमानिर्दिष्टं संख्याग्रहणमपि कबभावार्थम् ।

दिङ्नामान्यन्तराले ॥२।२।२६॥ तेन सहेति तुल्ययोगे ॥२।२।२८॥ अन्तरालप्रधानाभिधानादन्यपदार्थे इत्येव सिद्धम् । अमत्वार्थं वेदं कबभावार्थं वा ।

तत्र तेनेदमिति सरूपे ॥ २।२।२७॥ क्रियाभिधानादन्यपदार्थे इत्येव सिद्धम् । एकशेषप्रतिषेधार्थं वा वक्तव्यममत्वार्थं वा कबभावार्थं वा ।

चार्थे द्वन्द्वः ॥२।२।२९॥ चार्थे द्वन्द्ववचनेऽसमासेऽपि चार्थसंप्रत्ययादनिष्टप्रसङ्गः । अहरहर्नयमानो गामश्वं पुरुषं पशुमिति । सिद्धं तु युगपदधिकरणवचने द्वन्द्व इति । तत्र युगपदधिकरणवचनता दुःखा दुरुपपादा चेत्यन्त्यं प्रत्याख्यातम् । चेनैव कृतोऽर्थश्चार्थ इत्याश्रयणेनाद्यं प्रत्याख्यातम् । एकादीनां दशादिभिर्द्वन्द्वे विंशत्यादिषु वचनप्रसङ्गः । सिद्धं त्वधिकान्ता संख्या संख्यया समानाधिकरणा समस्यतेऽधिकलोपश्चेति वक्तव्यम् । सर्वो द्वन्द्वो विभाषयैकवद्भवतीति वा । नपुंसकत्वं तु न, लोकाश्रयत्वाल्लिङ्गस्य ।

उपसर्जनं पूर्वम् ॥२।२।३०॥ इदमशिष्यमनिष्टादर्शनात् । पञ्चम्यन्तयोः समासेऽर्थाभेदात्प्रधानस्यापूर्वनिपातः । विशेष्यार्थस्य भेदाभावात् । भेदनिबन्धनसम्बन्धाप्रनियोगित्वादित्यर्थः ।

निष्ठा ॥ २।२।३६ ॥ जातिकालसुखादिभ्यः परा निष्ठेति, एतज्जातिकालसुखादिभ्यः परनिष्ठायां

अन्तोदात्तवचनाज्ज्ञापकात्प्रत्याख्यातम् । कृतादीनामपि तत्प्रतिषेधवचनाज्ज्ञापकात्परनिपातः ।

कडाराः कर्मधारये॥२।२।३८॥ कडारादय इति वक्तव्यमिति बहुवचननिर्देशात्प्रत्याख्यातम् ।

अनभिहिते ॥२।३।१॥ उक्तार्थानामप्रयोग इत्येव सिद्धम् । इनमकज्बहुषु शप्ककल्पाद्यभाववत् तिङ्कृत्तद्धितसमासैरिति परिगणनम् । उत्सर्गे हि समानाधिकरणे विभक्तिर्वक्तव्या, कटं भीष्ममिति । न केवलेति समयात्कटोऽपि कर्म भीष्मादयोऽपीति वेत्यादिना प्रत्याख्यातम् । अनभिहितवचनमनर्थकं प्रथमाविधानस्यानवकाशत्वाद्वा विप्रतिषेधाद्वा । कृत्प्रयोगे तु षष्ठीप्रतिषेधार्थं कर्तव्यः स, एकत्वादीनां विभक्त्यर्थत्वे । कर्मादीनां विभक्त्यर्थत्वे तु नार्थोऽधिकारेण ।

तृतीया च होश्छन्दसि ॥ २।३।३ ॥ इदं सूत्रं भाष्ये प्रत्याख्यातम् । अग्निहोत्रशब्दस्य ज्योतिषि वृत्तिर्जुहोतिश्च प्रीणात्यर्थे, तदा कर्तृकरणयोरिति तृतीयासिद्धेः । यदाग्निहोत्रशब्दो हविषि जुहोतिश्च प्रक्षेपणे, तदा द्वितीया सिद्धेति ।

कालाध्वनोरत्यन्तसंयोगे ॥ २।३।५॥ अत्यन्तसंयोगे कालाध्वानौ कर्मवदिति वक्तव्यम् । न वा वक्तव्यम्, प्राक्तमेवैतत्कर्म । एवमपि, भावे लो वक्तव्यः सकर्मकत्वादिति । एतदकर्मकाणामित्युच्यते, न च केचित्कालभावाध्वभिरकर्मकास्त एवं विज्ञास्यामः क्वचिद्येऽकर्मका इति । सूत्रं त्वक्रिययाऽत्यन्तसंयोगार्थम् ।

सप्तमीपञ्चम्यौ कारकमध्ये ॥ २।३।७ ॥ क्रियामध्ये इति वक्तव्यमिति नान्तरेण साधनं क्रियायाः प्रवृत्तिर्भवति, क्रियामध्यं चेत्कारकमध्यमपि भवतीत्येवं प्रत्याख्यातम् ।

कर्मप्रवचनीययुक्ते द्वितीया ॥२।३।८॥ प्रत्यादिभिश्च लक्षणादिषूपसंख्यानं सप्तमीपञ्चमीप्रतिषेधार्थमिति, सप्तम्यामप्रतेरितिवचनात्पञ्चम्यां परेर्वर्जनार्थापसाहचर्याद्वर्जनार्थस्यैव ग्रहणमिति प्रत्याख्यातम्।

यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी ॥२।३।९॥ यस्य चेश्वरवचनमिति कर्तृनिर्देशश्चेदवचनात्सिद्धम् । अधिः स्वं प्रति कर्मप्रवचनीयसंज्ञ इति वक्तव्यम् ।

गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि ॥ २।३।१२॥ कर्मणि द्वितीयायाः क्रियया यमभिप्रैतीति चतुर्थ्याश्च सिद्धेरिदं प्रत्याख्यातम् ।

चतुर्थी संप्रदाने ॥ २।३।१३॥ तादर्थ्ये चतुर्थी वक्तव्येति चतुर्थ्यन्तस्य तदर्थेन समासविधानं ज्ञापकमाश्रित्य प्रत्याख्यातम् ।

कर्तृकरणयोस्तृतीया॥ २।३।१८ ॥ प्रकृत्यादिभ्य उपसंख्यानम्, कथंचित्सूत्रेणैव सिद्धिमाश्रित्य प्रत्याख्यातम् ।

सहयुक्तेऽप्रधाने ॥२।३।१९॥ अप्रधानवचनमनर्थकमुपपदविभक्तेः कारकविभक्तेर्बलीयस्त्वात् ।

इत्थंभूतलक्षणे ॥ २।३।२१॥ तत्स्थे प्रतिषेधः, अपि भवान्कमण्डलुपाणिं छात्रमद्राक्षीदिति, यत्रेत्थंभूतस्य पृथग्भूतं लक्षणं तत्रैवेदम्, प्राधान्येन लक्षणप्रतिनिर्देशादिति प्रत्याख्यातम् ।

अपादाने पञ्चमी ॥२।३।२८॥ ल्यप्लोपे इत्यादिवार्तिकानि अपादाने पञ्चमीत्येव सिद्धमित्यादिना भाष्ये प्रत्याख्यातानि ।

अन्यारादितरर्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते ॥ २।३।२९ ॥ इत्यत्राञ्चूत्तरपदग्रहणं षष्ठ्यतसर्थेति सूत्रस्थप्रत्ययग्रहणेन प्रत्याख्यातम् ।

दूरान्तिकार्थेभ्यो द्वितीया च ॥ २।३।३५ ॥ तद्युक्तात्पञ्चमीप्रतिषेधो दूरात् ग्रामस्येत्येतत्, ततोऽपि पञ्चमीदर्शनात्प्रत्याख्यातम् , दूरादवसथान्मूत्रमित्यादि ।

यस्य च भावेन भावलक्षणम् ॥ २।३।३७ ॥ भावलक्षणत्वाभावे (णेऽभावे) उपसंख्यानमित्येतत्, सकृदपि निमित्तत्वाय यत्कल्पते तदपि लक्षणं भवतीत्याश्रित्य प्रत्याख्यातम् ।

प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा ॥२।३।४६॥ मात्रपदवचनपदयोरन्यतरच्छक्यमकर्तुम्, उभयोरप्युक्तेष्वप्येकत्वादिषु यथा स्यादेको द्वौ बहव इत्येव प्रयोजनम् । पदसामानाधिकरण्ये उपसंख्यानमित्येतयदत्राधिक्यं वाक्यार्थः स इति प्रत्याख्यातम् । अभिहिते प्रथमेति न्यासान्तरेण, तिङ्समानाधिकरणे प्रथमेति न्यासान्तरेण च प्रत्याख्यातम् ।

षष्ठी शेषे ॥२।३।५०॥ अर्थनियमे शेषग्रहणं प्रत्याख्यातम् । विशेष्यात्प्रतिषेधो वक्तव्य इति, एतद्विशेष्ये यदाधिक्यं स वाक्यार्थ इति प्रत्याख्यातम् ।

अधीगर्थदयेशां कर्मणि ॥ २।३।५२ ॥ कर्मादिष्वकर्मकवद्वचनमिति, एतच्छेष इत्यनुवृत्त्या प्रत्याख्यातम् ।

चतुर्थ्यर्थे बहुलं छन्दसि ॥ २।३।६२ ॥ षष्ठ्यर्थे च चतुर्थी वक्तव्येति, एतत् चतुर्थी, अर्थे बहुलमिति योगविभागेन प्रत्याख्यातम् ।

क्तस्य च वर्त्तमाने ॥२।३।६७॥ नपुंसके भावे क्तस्य योगे उपसंख्यानमिति शेषत्वविवक्षया प्रत्याख्यातम् । **अधिकरणवाचिनश्च** ॥ (२।३।६८॥) इत्युदाहरणे इदमहेः सुप्तमिहाहिना सुप्तमिहाहिः सुप्त इहाहेः सुप्तं ग्रामस्य पार्श्वे इति इष्यत एव चातुःशब्द्यम् ।

न लोकाव्ययनिष्ठाखलर्थतृनाम् ॥२।३।६९॥ लादेशे सल्लिङ्ग्रहणं कर्त्तव्यमित्येतदाद्गमेति सूत्रे लिङ्वदित्यतिदेशाश्रयणेन प्रत्याख्यातम् । उकारप्रयोगे नेति वक्तव्यमित्युकारप्रश्लेषात्प्रत्याख्यातम् । शानन्चानश्शतृणामुपसंख्यानमित्येतत् तृनामिति प्रत्याहाराश्रयणेन प्रत्याख्यातम् ।

द्विगुरेकवचनम् ॥ २।४।१ ॥ द्विग्वर्थ एकवदिति वक्तव्यमित्येकवचनमित्यन्वर्थग्रहणेन प्रत्याख्यातम् । समाहारैकत्वात्सिद्ध्या सूत्रं प्रत्याख्यातम् ।

द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम् ॥२।४।२॥ तत्पूर्वोत्तरपदग्रहणं कर्त्तव्यमित्येतत्प्रत्येकमङ्गशब्दपरिसमाप्त्या प्रत्याख्यातम् ।

क्षुद्रजन्तवः ॥२।४।८॥ आनकुलात् क्षुद्रजन्तवः ।[1]

शूद्राणामनिरवसितानाम् ॥ २।४।१० ॥ यैर्भुक्ते पात्रं संस्कारेणापि न शुध्यति ते निरवसिताः ।[2]

विभाषा वृक्षमृगतृणधान्यव्यञ्जनपशुशकुन्यश्ववडवपूर्वापराधरोत्तराणाम् ॥२।४।१२॥ पशुशकुनिद्वन्द्वे विरोधिनां येषां च विरोध इत्येतद्भवति पूर्वविप्रतिषेधेनेति, येषां चेति चेन प्रत्याख्यातम् । अश्ववडवयोः पूर्वलिङ्गत्वात् पशुद्वन्द्वनपुंसकं पूर्वविप्रतिषेधेनेति प्रतिपद्विधानात्सिद्धमिति प्रत्याख्यातम् ।

परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः ॥ २।४।२६ ॥ प्राप्तापन्नालंपूर्वगतिसमासेषु प्रतिषेधो वक्तव्यः इत्येकदेशिसमासप्रत्याख्यानपूर्वकं तत्पुरुषग्रहणप्रत्याख्यानेन प्रत्याख्यातम् ।

अर्धर्चाः पुंसि च ॥२।४।३१॥ अर्धर्चादय इति वक्तव्यमिति बहुवचननिर्देशात्प्रत्याख्यातम् ।

इदमोऽन्वादेशेऽशनुदात्तस्तृतीयादौ ॥ २।४।३२ ॥ विचित्रास्तद्धितवृत्तय इति नान्वादेशेऽकजुत्पत्तिः ।

द्वितीयाटौस्वेनः ॥२।४।३४॥ एनतमाश्रित्यैनः प्रत्याख्यातः । अतिप्रसङ्गस्तु यथालक्षणमप्रयुक्ते इति वारितः ।

आर्धधातुके ॥२।४।३५॥ सामान्यनिर्देशात्सामान्येन पौर्वापर्यासंभवाद्विषयसप्तम्येषा । अजेर्व्यवस्थितविभाषामाश्रित्याघञपोरिति प्रत्याख्यातम्, क्यपि प्रतिषेधो वक्तव्य इति च ।

तद्राजस्य बहुषु तेनैवास्त्रियाम् ॥२।४।६२॥ द्वन्द्वेऽबहुषु लुग्वक्तव्यः, गर्गवत्सवाजा इत्येतद् द्वन्द्वे सर्वेषां बह्वर्थत्वादित्यनेन प्रत्याख्यातम् । गोत्रस्य बहुषु लोपिनो बहुवचनान्तस्य प्रवृत्तौ द्व्येकयोरलुग्वक्तव्यः, बिदानामपत्यं माणवको बैदः बैदाविति । इदं गोत्रेऽलुगचीत्यनेन सिद्धम् । वर्णाश्रयेऽपि क्वचित्प्रत्ययलक्षणाङ्गीकारात्, अच्पदेन हलादिभिन्नोपलक्षणाद्वा । बिदानामपत्यं बहवो माणवका बिदा इत्यत्र तु युवबहुत्वे वर्त्तमानस्य पुनर्लुक्, पुनरलुक् तु न, प्रथमादित्यनुवर्त्य प्रथमगोत्रप्रत्ययान्तस्यैवालुक् न तु द्वितीयमर्थमुपसंक्रान्तस्येत्यर्थात् । यद्वा गोपवनादिषु गर्गभार्गविकापाठस्य नियमार्थत्वमाश्रित्य प्रत्याख्यातम् । एकद्विवचनान्तस्य प्रवृत्तौ बहुषु लोपो यूनि वक्तव्यः । बैदस्यापत्यं बहवो माणवका बिदा इत्येतदत्रन्तं यद्बहुष्वित्याश्रित्य प्रत्याख्यातम् । काश्यपा इत्यादौ तु लौकिकगोत्रग्रहणान्न दोषः । न चैवं बिदानामपत्यं माणवको बैदो बैदावित्यत्रापि प्राप्नोति । अलुगत्र लुकं बाधते । पुनर्लुको निमित्ताभावान्न पुनर्लुक् । यद्वा बिदानामपत्यं बिदशब्दात् द्व्येकयोरुत्पत्तिः । बैदस्यापत्यमिति विगृह्य बिदशब्दाद्बहुषूत्पत्तिर्भविष्यति, अविरविकन्यायेन । इदं गोत्रेऽलुगचीति सूत्रे भाष्ये । प्रत्ययार्थबहुत्वे लुगिति ज्यायः ।

आगस्त्यकौण्डिन्ययोरगस्तिकुण्डिनच् ॥२।४।७०॥ प्रकृत्यादेशौ भवत इत्येतद्योगविभागेन प्रत्याख्यातम् ।

१–२–अत्रास्य सूत्रद्वयस्य संस्थापने विशिष्टं प्रयोजनं चिन्त्यम् ।

यङोऽचि च ॥ २।४।७४ ॥ ऋतोऽचीति वक्तव्यमिति सनीस्रंसो दनीध्वंस इतीष्टमिति प्रत्याख्यातम् ।

गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु ॥२।४।७७॥ इण्पिबत्योर्ग्रहणं कर्त्तव्यमिति गातीति-निर्देशेन लुग्विकरणपरिभाषया च प्रत्याख्यातम् ।

तनादिभ्यस्तथासोः ॥२।४।७९॥ एकवचनग्रहणं कर्त्तव्यमिति थास्साहचर्येण प्रत्याख्यातम् ।

आमः ॥२।४।८१॥ लुङ्लोटोरुपसंख्यानमिति लेरित्यस्य निवृत्त्या प्रत्याख्यातम् । णलः प्रतिषेध इत्येतदर्थवत्परिभाषया सन्निपातपरिभाषया (च) प्रत्याख्यातम् ।

अव्ययादाप्सुपः ॥२।४।८२॥ अव्ययादापो लुग्वचनानर्थक्यं लिङ्गाभावात् ।

नाव्ययीभावादतोऽम् त्वपञ्चम्याः ॥२।४।८३॥ योगविभागः कर्त्तव्य इति, एतत् तुना प्रत्याख्यातम् । अपादानपञ्चम्या इति वक्तव्यमिति, न वोत्तरपदस्य कर्मप्रवचनीययोगात्समासात्पञ्चम्यभाव इति प्रत्याख्यातम् ।

लुटः प्रथमस्य डारौरसः ॥२।४।८५॥ टेरेत्वादिमे पूर्वविप्रतिषेधेन वक्तव्या आत्मनेपदग्रहणं वा कर्त्तव्यमिति । डारौरसः कृते टेरे यथा द्वित्वं प्रसारणे । समसंख्येन नार्थोऽस्ति सिद्धं स्थानेऽर्थतोऽन्तरा ॥ आन्तर्यतो व्यवस्था त्रय एवेमे भवन्तु सर्वेषाम् । टेरेत्वं च परत्वात् कृतेऽपि तस्मिन्निमे सन्तु ॥ इत्यनेन प्रत्याख्यातम् । डा शित्कर्त्तव्य इत्यनित्यत्वात्सिद्धमित्यनेन प्रत्याख्यातमिति ।

इति द्वितीयोऽध्यायः

—*—

प्रत्ययः ॥३।१।१॥ प्रकृत्युपपदोपाधीनां प्रतिषेधो वक्तव्यः । न वा, निमित्तस्य निमित्तिकार्यार्थत्वात्, प्रधाने कार्यसंप्रत्ययाद्वा । यस्यापूर्व उपदेशः स प्रधानम् । विकारागमेषु च परविज्ञानात् , षष्ठीनिर्दिष्टस्य विकारागमयुक्तत्वात् ।

परश्च ॥३।१।२॥ उभयतो नियमोऽयं प्रकृतिपर एव प्रत्ययः, प्रत्ययपरैव च प्रकृतिरिति[1] ।

आद्युदात्तश्च ॥३।१।३ आद्युदात्तस्य प्रत्ययसंज्ञासन्नियोगे प्रयोजनमागमानामनुदात्तत्वम्[2] ।

गुप्तिज्किद्भ्यः सन् ॥३।१।५॥ गुप्तिज्कितमानोऽनुदात्तेतः । गुपादिष्वनुबन्धकरणमात्मनेपदार्थम्[3] ।

मान्बधदान्शान्भ्यो दीर्घश्चाभ्यासस्य ॥३।१।६॥ अभ्यासदीर्घत्वेऽवर्णस्य दीर्घप्रसङ्गः । न वाभ्यासविकारेष्वपवादस्योत्सर्गाबाधकत्वात् , अथवा दीर्घश्च आभ्यासस्येति च्छेदः ।

---

१ सिद्धं तूभयनियमादित्यनेन परवचनमनर्थकमित्यादिवार्तिकानां प्रत्याख्यातुर्भाष्यकारस्य सिद्धान्तमुभयतो नियमेत्यादिना प्रदर्शयतो नागेशस्य वार्तिकप्रत्याख्यानप्रदर्शन एव तात्पर्यमतो न प्रकृतग्रन्थीयविषयेण विरोधः । २, ३ प्रदर्शितरीत्या प्रयोजनं चिन्त्यम् ।

धातोः कर्मणः समानकर्तृकादिच्छायां वा ॥ ३।१।७॥ कर्मग्रहणात्सन्विधौ धातुग्रहणानर्थक्यम् । सोपसर्गं कर्मेति चेत्कर्मविशेषकत्वादुपसर्गस्य अनुपसर्गमेव कर्म । सोपसर्गस्य हि कर्मत्वे धात्वधिकारेऽपि सनोऽविधानमकर्मत्वात् । सुबन्ताच्चाप्रसङ्गः । क्यजादीनामपवादत्वादनभिधानाद्वा, सुबन्तस्य समानकर्तुरभावाद्वा । कर्मसमानकर्तृग्रहणानर्थक्यमिच्छाभिधाने प्रत्ययनि(वि)धानादकर्मणोऽसमानकर्तृकाद्वोत्पद्यमाने नेच्छाया अनभिधानात् । अङ्गपरिमाणार्थं तु धातुग्रहणं कर्त्तव्यम्, सोपसर्गमेव कर्म, कर्मणोऽवयवस्य धातोरिति व्याख्यानान्न दोषः । वावचनानर्थक्यमेकार्थीभावे नित्यत्वात्सनः । आशङ्कायामचेतनेषूपसंख्यानम् । अन्यत्र च इच्छेवेच्छेत्युपमानाद्वा सिद्धम् । सर्वस्य वा चेतनावत्वात् । एवं ह्याह, अयस्कान्तमयः संक्रामति, शृणोत ग्रावाण इति श्रुतेश्च । ग्रामं गन्तुमिच्छतीति गमेर्ग्रामः कर्म इषेरुभे कर्मणी ।

सुप आत्मनः क्यच् ॥३।१।८॥ महान्तं पुत्रमिच्छतीत्यादौ न क्यच्, अगमकत्वात् । वाक्ये प्रतीयमानस्य क्यच्यप्रतीतेः । मुण्डयति माणवकमिति भवत्येव, गमकत्वात् ।[1] क्यजाद्यन्तेभ्यो भावे कर्त्तरि च लकारादयो न कर्मणि ।

भृशादिभ्यो भुव्यच्वेर्लोपश्च हलः ॥ ३।१।१२ ॥ च्विप्रतिषेधानर्थक्यं भवत्यर्थे क्यङ्विधानात्, च्वियोगे तेनैवोक्तत्वात् । भवत्यर्थस्य च्वेरप्राप्तेः । डाचि वचनप्रामाण्यात् । अभूततद्भाव इतिवक्तव्यमित्यच्वेरितिपर्युदासेन प्रत्याख्यातम् ।

लोहितादिडाज्भ्यः क्यष् ॥३।१।१३॥ अत्रादिग्रहणं भृशादिष्वितराणीत्याश्रित्य प्रत्याख्यातम् । ककारषकारौ च प्रत्याख्यातौ, प्रयोजनाभावात् ।

कष्टाय क्रमणे ॥३।१।१४॥ सत्रकक्षेत्यादिवार्तिकं कष्टायेत्यस्य कष्टार्थे यत्प्रातिपदिकमित्यर्थेन प्रत्याख्यातम् ।

कर्मणो रोमन्थतपोभ्यां वर्तिचरोः॥३।१।१५॥हनुचलन इत्येतदन्यत्रानभिधानात्प्रत्याख्यातम् ।

नमोवरिवश्चित्रङः क्यच् ॥ ३।१।१९ ॥ नमस्यति देवानित्यत्र चतुर्थी न, प्रकृत्यन्तरत्वात्, अर्थवत्परिभाषयोपपदविभक्तेरिति वा न ।[2]

धातोरेकाचो हलादेः क्रियासमभिहारे यङ् ॥३।१।२२॥ अत्रापि धातुग्रहणं सन्विधिवत् । एकाज्हलादिग्रहणानर्थक्यं क्रियासमभिहारे यङ्वचनादनेकाचोऽहलादेश्चानभिधानान्न, भृशं शोभते भृशं रोचत इतिवत् ।

नित्यं कौटिल्ये गतौ ॥ ३।१।२३ ॥ लुपसदचरजपजभदहदशगृभ्यो भावगर्हायाम् ॥३।१।२४॥ विग्रहेण विशेषस्यासंप्रत्ययान्नित्यग्रहणमनर्थकम् । क्रियासमभिव्याहारे च नैतेभ्यो यङ् अनभिधानात् ।

---

१ अमुण्डादीनामितिवार्त्तिकप्रत्याख्याने तात्पर्यम् । २ नमसः क्यचि द्वितीयानुपपत्तिरिति वार्त्तिकप्रत्याख्याने तात्पर्यम् । एवमेतादृशेषु स्थलेष्वन्यत्रापि ज्ञेयम् ।

हेतुमति च ॥ ३।१।२६॥ इदं प्रत्ययार्थ इति सिद्धान्तः। प्रकृत्यर्थविशेषणत्वं तु न युक्तम्, पचति पाचयतीति प्रधानार्थभेदात्। तदुक्तं भाष्ये, यावता व्यक्तमर्थान्तरं गम्यते पचति पाचयतीति। बाढं युक्तमित्यादि—इह पचेः कः प्रधानार्थः, यासौ तण्डुलानां विक्लित्तिरथेदानीं तदभिसंधिपूर्वकं प्रेषणमध्येषणं वा, युक्तं यत्सर्वं पच्यर्थः स्यादित्यन्तैकदेशयुक्तिः। कृष्यादिषु चानुत्पत्तिर्वक्तव्या। एकान्ते तूष्णीमासीन उच्यते, पञ्चभिर्हलैः कृषतीति। न वा, नाना क्रियाणां कृष्यर्थत्वात्, प्रतिविधानेऽपि कृषिर्वर्तते। यज्यादिषु चाविपर्यासः सिद्धो नाना क्रियाणां यज्यर्थत्वात्, यजिस्त्यागेऽपि वर्तते। आख्यानात्कृत इत्यादीनि, न वा सामान्यकृतत्वाद्धेतुतो ह्यविशिष्टमिति (प्रत्याख्यातानि)।

कर्मणिङ् ॥ ३।१।३०॥ निषेधाश्च बलीयांसो भवन्ति।

सनाद्यन्ता धातवः ॥ ३।१।३२ ॥ बहुलमेतन्निदर्शनमित्युक्तेर्भूवादय इत्येव सिद्धमिति प्रत्याख्यातमिदम्।

सिब्बहुलं लेटि ॥ ३।१।३४॥ सिबुत्सर्गश्छन्दसि सनाद्यन्ताधिकारे वक्तव्यो नेषत्वाद्यर्थः। नेषतेः प्रकृत्यन्तरत्वात्सिद्धम्।

इजादेश्च गुरुमतोऽनृच्छः ॥ ३।१।३६ ॥ लिङ्निमित्तात्प्रतिषेध उपदेशवचनं वा वक्तव्यमिति सन्निपातपरिभाषया प्रत्याख्यातम्।

उषविदजागृभ्योऽन्यतरस्याम् ॥ ३।१।३८॥ विदेराम् किद्वक्तव्य इत्याम्सन्नियोगेन विदेरदन्तत्वनिपातनात्प्रत्याख्यातम्।

च्लि लुङि ॥ ३।१।४३ ॥ च्लेश्चित्वं व्यर्थम्। सिच इकारश्च प्रत्याख्यातः।

णिश्रिद्रुस्रुभ्यः कर्त्तरि चङ् ॥ ३।१।४८॥ कर्मकर्त्तरि चोपसंख्यानमित्येतत्कर्मणि कस्याप्यविधानात् कर्मकर्त्तुरपि कर्तृत्वाच्च प्रत्याख्यातम्।

जॄस्तम्भुम्रुचुम्लुचुग्रुचुग्लुचुग्लुञ्चुश्विभ्यश्च ॥३।१।५८॥ अनयोरन्यतरः प्रत्याख्यातः।

सार्वधातुके यक् ॥३।१।६७॥ कर्मकर्त्तर्युपसंख्यानमित्येतद् न दुहस्नुनमामिति ज्ञापकेन प्रत्याख्यातम्, प्रकारान्तरैरपि।

यसोऽनुपसर्गात् ॥३।१।७१॥ संयसश्चेति नियममाश्रित्यानुपसर्गादिति प्रत्याख्यातम्।

धिन्विकृण्व्योर च ॥३।१।८०॥ नुम्विधावुपदेशिवद्वचनात्सनुम्कनिर्देशः प्रत्याख्यातः।

हलः श्नः शानज्झौ ॥३।१।८३॥ पिच्च ङिन्न भवति ङिच्च पिन्न भवतीति वक्तव्यमित्येतत्सार्वधातुकमपिदित्यपिदित्येतदावृत्त्या प्रसज्यप्रतिषेधेन च व्याख्याय प्रत्याख्यातम्। श्नादेशस्य शानचः शित्त्वं सार्वधातुकादेशेऽनुबन्धा न स्थानिवद्भवन्तीत्यस्य ज्ञापकमित्येतत् तिप्सिप्मिपामादेशानां पित्त्वानापत्त्या प्रयोजनाभावेन चायुक्तमित्युक्तम्। हेरपित्त्वविधानात्तातङि ङकारोच्चारणाच्च सूत्रविरुद्धमेतदित्युक्तम्। एवं शानचः शित्त्वं प्रत्याख्यातम्। वक्ष्यमाणेत्यादौ टाप्त्वजादेराकृतिगणत्वाद्बोध्यः।

---

१ अस्यात्र संग्रहे प्रयोजनं चिन्त्यम्। एवमेतादृशेषु स्थलेषु ज्ञेयम्।

कर्मवत्कर्मणा तुल्यक्रियः ॥३।१।८७॥ कर्मवदकर्मकाणामिति वचनं सकर्मकाणां प्रतिषेध इत्याश्रित्य प्रत्याख्यातम् । समानधाताविति वक्तव्यमिति धातोरित्यनुवृत्तेः प्रत्यासत्त्या प्रत्याख्यातम् । कर्मस्थभावकानां कर्मस्थक्रियकाणां चेति वक्तव्यमिति, कर्मस्थया क्रिययेत्युच्यते न च कर्तृस्थभावकादीनां कर्मणि क्रियायाः प्रवृत्तिरस्तीति प्रत्याख्यातम् । लान्तस्य कर्त्ता कर्मवद्भवतीत्येतत् लिङ्क्याशिष्यङिति द्विलकारकनिर्देशेन प्रत्याख्यातम् । सकर्मकाणां प्रतिषेधो वक्तव्य इत्येतत्, तपस्तपःकर्मकस्यैवेति सूत्रे तपेरेव सकर्मकस्य, तस्य च तपःकर्मकस्यैवेति नियमाश्रयणेन प्रत्याख्यातम् । दुहिपच्योरिति वार्तिके परस्मैपदानिष्ट्या बहुलग्रहणं प्रत्याख्यातम् । स्नवत्यादीनां प्रतिषेधो वक्तव्य इति, अर्थान्तरावगत्या तुल्यक्रियत्वाभावेन प्रत्याख्यातम् ।

कुपिरजोः प्राचां श्यन्परस्मैपदं च ॥३।१।९०॥ सार्वधातुक इति वक्तव्यमिति, सार्वधातुके यगित्यतः सार्वधातुके इत्यनुवृत्त्या लग्रहणानुवृत्त्या लस्थानिकसार्वधातुके इत्यर्थेन प्रत्याख्यातम् । श्यना स्यादीनां तु न बाधः, लावस्थायां स्यादय इति तेषामन्तरङ्गत्वात् ।

धातोः ॥३।१।९१॥ आतृतीयाध्यायसमाप्ति धात्वधिकारे पश्यतीत्यादौ विकरणव्यवधानाल्लादयो न स्युः, तस्मात्तत्र विहितविशेषणं तत्, प्राग्लादेशादधिकारे आर्धधातुकसंज्ञायां धातुग्रहणं कर्त्तव्यमिति ।

तत्रोपपदं सप्तमीस्थम् ॥३।१।९२॥ अत्र समर्थग्रहणं कर्त्तव्यमित्येतद्धातोरित्यनुवृत्त्या यस्य धातोर्यत्कर्मेति प्रत्यासत्त्या पदगन्धेन समर्थपरिभाषोपस्थित्या च प्रत्याख्यातम् । निमित्तमुपपदं प्रत्ययस्येति वक्तव्यमित्येतत्, उपपदसंज्ञासंनियोगेन प्रत्ययविधानात्प्रत्याख्यातम् ।

कृदतिङ् ॥३।१।९३॥ अतिङ्ग्रहणं प्रत्याख्यातम् ।

वाऽसरूपोऽस्त्रियाम् ॥३।१।९४ स्त्रियामित्यधिकृत्य विहितस्य प्रतिषेधः । असरूपो बाधको वा भवतीति वक्तव्यमन्यथोत्सर्गापवादयोरुभयोरपि विकल्पे पक्षे प्रत्ययाश्रवणमपि स्यादित्येतत्, केवलप्रकृतेः स्वार्थेऽप्यवर्त्तमानत्वात्प्रत्ययार्थाभिधायकशब्दान्तराभावाच्च, न केवला प्रकृतिरिति निषेधाच्चानुत्पत्तिर्न भविष्यति, तद्धितेषु तु षष्ठ्यादिसत्वादपत्यमित्यादिशब्दान्तरसत्वाच्च न क्षतिरित्यादिना प्रत्याख्यातम् । असारूप्यस्य सप्रतियोगिकत्वाद्धुत्सर्गवेलायां प्रतियोग्यनुपस्थितेरपवादवेलायां चोत्सर्गरूपप्रतियोग्युपस्थितेरपवादस्यैव ग्रहणमित्यादिना च ।

कृत्याः ॥३।१।९५॥ प्राङ्ण्वुल इति वक्तव्यमित्यर्हे तृज्विधानेन ज्ञापकेन प्रत्याख्यातं वध्य-(अवधि) साधकम् । (**तव्यत्तव्यानीयरः ॥३।१।९६॥**) तद्धितो वेत्येतत्स्वरे दोषेण प्रत्याख्यातम् ।

वदः सुपि क्यप् च ॥ ३।१।१०६ ॥ अत्रानुपसर्गग्रहणमनुवर्त्यर्थमित्यन्वाख्यानमात्रम् । एतदन्वाख्यानं निष्फलमिति प्रत्याख्यातम् ।

भुवो भावे ॥३।१।१०७॥ उत्तरार्थं भावग्रहणम्, हनस्तचेति[2] ।

---

१ लादेशाः इति मूल एव टिप्पनरूपः पाठः । २ प्रयोजनं चिन्त्यम् ।

३

ई च खनः ॥३।१।१११॥ अत्र दीर्घोच्चारणं प्रत्याख्यातम् ।

भृञोऽसंज्ञायाम् ॥३।१।११२॥ संज्ञायां ये विधीयन्ते तेषु प्रत्ययान्तेन चेत्संज्ञा गम्यत इत्यर्थः[१] ।

ओरावश्यके ॥३।१।१२५ ॥ आवश्यके द्योत्ये अवश्यपदप्रयोगोऽपि क्वचित् द्विर्बद्धमिति न्यायेन, समासस्वरौ मयूरव्यंसकादित्वाद्, विस्पष्टादित्वा(व)त्स्वरः,[२] । आवश्यके ण्यतः स्तौतेः क्यप् पूर्वविप्रतिषिद्धमिति, वदः सुपीत्यत्र क्यपि वर्त्तमाने पुनः क्यब्ग्रहणात्क्यबेवेत्यर्थकात्प्रत्याख्यातम् ।

अग्नौ परिचाय्योपचाय्यसमूह्याः ॥३।१।१३१॥ अत्र समूह्यग्रहणं प्रत्याख्यातम् । ऊहेर्वह्यर्थाद्दहलोरिति ण्यता सिद्धेः ।

ण्वुल्तृचौ ॥३।१।१३३॥ तुरिष्ठेमेयस्सु तुश्छन्दसीत्यत्र सामान्यग्रहणाविघातार्थश्चकारः । अप्तृन्तृजित्यत्र तृ इत्येव पाठ्यम् । एतयोरेव योनिसम्बन्धयोरिति स्वसृनप्तृग्रहणनियमेन मात्रादौ नातिप्रसङ्गः । ण्वुलि सकर्मकग्रहणं कर्तव्यमित्येतद्धातुमात्रात् ण्वुल्दर्शनेन प्रत्याख्यातम् । तृजादिषु वर्त्तमानकाले इति वक्तव्यमित्येतत्कालमात्रे दर्शनात्प्रत्याख्यातम् ।

कर्मण्यण् ॥३।२।१ ॥ कर्मणि निर्वर्त्यमानविक्रियमाणयोरिति वक्तव्यम्, तत्र कर्मणि चेद्वेदाध्यायादीनामुपसंख्यानम्, यत्र च नियुक्तस्तत्रोपसंख्यानम्, हृग्रहिनीवहिभ्यश्चेति वक्तव्यमित्येतदन्यत्रानभिधानात्प्रत्याख्यातम् । शीलिकामिभक्ष्याचरिभ्यो णः । पूर्वपदप्रकृतिस्वरत्वं च इक्षिक्षमिभ्यां चेत्येतद्, भक्षयत्यादिभ्योऽचि तदन्तेन बहुव्रीहिणा सिद्धिमाश्रित्य प्रत्याख्यातम् । मांसे कामोऽस्य मांसकाम इति बहुव्रीहिरिष्ट एव । अम्भोऽभिगमेति बहुव्रीहिर्नेष्यते, अम्भोऽभिगामीत्येव । एवं काण्डानि लावो यस्येति वाक्यं बहुव्रीहिश्च नेष्यते ।

आतोऽनुपसर्गे कः ॥३।२।३॥ सर्वत्र प्रसारणिभ्यो ड इत्येतत्, नित्यं संप्रसारणं ह्वो यण् वार्णादाङ्गं न पूर्वत्वम् । योऽनादिष्टादचः पूर्वस्तत्कार्ये स्थानिवत्त्वं हि ॥ प्रोवाच भगवान् कात्यस्तेनासिद्धिर्यणस्तु ते । आतः को लिण् नैङः पूर्वः सिद्ध आह्वस्तथा सति ॥ इति प्रत्याख्यातम् ।

सुपि स्थः ॥३।२।४॥ भावे चेति वक्तव्यमित्येतत् स्थः सुपीति योगविभागेन प्रत्याख्यातम्, कच्छप इत्यादि च साधितम् ।

अमनुष्यकर्तृके च ॥३।२।५३॥ अप्राणिकर्तृक इति वाच्यमिति, शशघ्नी शकुनिरित्यसिद्ध्या प्रत्याख्यातम् । नगरघातो हस्तीति कृत्यल्युटो बहुलमित्यण् भविष्यतीत्युक्तम् ।

आढ्यसुभगस्थूलपलितनग्नान्धप्रियेषु च्व्यर्थेष्वच्वौ कृञः करणे ख्युन् ॥ ३।२।५६ ॥ ख्युनि च्विप्रतिषेधानर्थक्यम्, ल्युट्ख्युनोरविशेषात् । उत्तरार्थं तु ।

---

१ भृञः संज्ञाप्रतिषेधे स्त्रियामप्रतिषेधोऽन्येन विहितत्वादिति वार्तिकप्रत्याख्याने तात्पर्यम् ।

२ आवश्यक उपपद इति चेद् द्योत्य उपसंख्यानमित्यादिप्रत्याख्याने तात्पर्यम् । एवमन्यत्रापि ज्ञेयम् ।

कर्तरि भुवः खिष्णुच्खुकञौ ॥३।२।५७॥ इष्णुच इकारादित्वमुदात्तत्वात्कृतं भुवः । नञस्तु स्वरसिद्ध्यर्थमिकारादित्वमिष्णुचः ॥

त्यदादिषु दृशोऽनालोचने कञ्च ॥३।२।६०॥ कृदर्थस्य कर्तृरूपस्यानुपपत्तेरिवार्थे तद्धितो द्रष्टव्यः, स इवायं तादृक् । अथवा कर्मकर्त्ताऽयम् ।

अदोऽनन्ने ॥३।२।६८॥ (**क्रव्ये च** ॥३।२।६९॥) अदोऽनन्ने क्रव्येग्रहणं वासरूपनिवृत्त्यर्थम् ।

सुप्यजातौ णिनिस्ताच्छील्ये ॥३।२।७८॥ सुपीति वर्त्तमाने सुब्ग्रहणं सुब्मात्रे यथा स्यात्, अनुपसर्ग इत्येवं हि तत् ।

व्रते ॥३।२।८०॥ नञाऽसामर्थ्येऽपि समासो वक्तव्यः । तेनासूर्यं पश्यानीत्यादि सिद्धम् ।

भूते ॥३।२।८४॥ अस्य न प्रयोजनम्, वक्ष्यमाणप्रत्ययानां स्वभावतो भूत एव वृत्तेः । प्रयोजनं तु, कुमारघाती, शीर्षघाती, आखुहा विडालः, सुपुपुषः, नेहाग्निमादधानस्येति ।

ब्रह्मभ्रूणवृत्रेषु क्विप् ॥३।२।८७॥ अन्येभ्योऽपि दृश्यत इति सिद्धे ब्रह्मादिष्वेव हन्तेः क्विप्, ब्रह्मादिषु हन्तेः क्विबेवेत्युभयतो नियमोऽयम् । एवं च बहुलं छन्दसीत्युत्तरं सूत्रमर्थवद्भवति ।

उपेयिवाननाश्वाननूचानश्च ॥३।२।१०९॥ नोपेयिवान्निपात्यो द्विर्वचनादिट् भविष्यति परत्वात्, अन्येषामेकाचां द्विर्वचनं नित्यमित्याहुः । अस्य पुनरिट् च नित्यो द्विर्वचनं च न विहन्यते ह्यस्य । द्विर्वचने चैकाच्त्वात्तस्मादिड् बाधते द्वित्वम् ॥

लुङ् ॥३।२।११०॥ लुङ्लृटोरपवादप्रसङ्गो भूतभविष्यतोरविशेषवचनात् । न वा, अपवादस्य निमित्ताभावादनद्यतने हि तयोर्विधानम् । विद्यमानमप्यनद्यतनत्वं न विवक्षितम् । किन्तु भूतकालसामान्यमेवेत्यर्थः ।

विभाषा साकाङ्क्षे ॥३।२।११४॥ भवेत्पूर्वं परमाकाङ्क्षतीति साकाङ्क्षम् । परं तु कथं साकाङ्क्षम् । परमपि साकाङ्क्षम्, अस्त्यस्मिन्नाकाङ्क्षेत्यतः । अत्र सर्वत्रेति वक्तव्यम् । यदि चायदि च ।

परोक्षे लिट् ॥३३।२।११५॥ परो भावः परस्याक्षे परोक्षे लिटि दृश्यताम् । उत्वं वादेः परादक्ष्णः सिद्धं वास्मान्निपातनात् ॥ क्रिया नामेयमत्यन्तापरदृष्टा अनुमानगम्या न शक्या पिण्डीभूता निदर्शयितुं, यथा गर्भो निर्लुठितः । साधनेषु परोक्षेषु साधनं च गुणेभ्योऽन्यदिति तस्य प्रत्यक्षत्वपरोक्षत्वसंभवः । अथवा य एते क्रियाकृता विशेषाः सी(ची)त्काराः फूत्काराश्च तेषु परोक्षेषु द्व्यहत्र्यहवृत्तं कुड्यकटान्तरितं च परोक्षम् ।

ननौ पृष्टप्रतिवचने ॥३।२।१२०॥ क्रियाया असमाप्तेर्विवक्षितत्वाद्वर्त्तमाने लडित्येव सिद्धम् । शतृशानचाविष्येते एवेतीदं प्रत्याख्यातम् ।

वर्तमाने लट् ॥३।२।१२३॥ आपादसमाप्तेरयमधिकारः, तुमुनित्येतत्पर्यन्तं वा । प्रवृत्तस्याविरामे लड्वक्तव्यः । नित्यप्रवृत्ते च वक्तव्यः कालाविभागात् । इदं प्रत्याख्यातम् । आरम्भानपवर्गाद् न्याय्योऽयं वर्त्तमानकालः । स्थास्यन्ति पर्वता इत्यादिकालविभागाच्च भूतभविष्यद्वर्त्तमानानां राज्ञां याः क्रियास्तास्ति-

घ्तेरधिकरणम् । अपर आह, नास्ति वर्तमानः कालः । न वर्त्तते चक्रमिषुर्निपात्यते न स्यन्दते सरितः सागराय । कूटस्थोऽयं लोको न विचेष्टितास्ति यो ह्येवं पश्यति सोप्यनन्धः । मीमांसको मन्यमानो युवा मेधाविसम्मतः । काकं स्नेहादनुपृच्छति किं ते पतितलक्षणम् ।। अनागते न पतसि अतिक्रान्ते च काक न । यदि संप्रति पतसि सर्वो लोकः पतत्ययम् ।। अनागतमतिक्रान्तं वर्तमानमिति त्रयम् । सर्वत्र च गतिर्नास्ति गच्छतीति किमुच्यते ।। क्रियाप्रवृत्तौ यो हेतुस्तदर्थं यद्विचेष्टितम् । तत्समीक्ष्य प्रयुञ्जीत गच्छतीत्यविचारयन् ।। अपर आह, अस्ति वर्त्तमानः कालः आदित्यगतिवन्नोपलभ्यते । विसस्य वाला इव दह्यमाना न लक्ष्यते विकृतिः सन्निपाते । अस्तीति तां वेदयन्ते त्रिभावाः सूक्ष्मो हि भावोऽनुमितेन गम्यः ।।

लटः शतृशानचावप्रथमासमानाधिकरणे ।।३।२।१२४।। आदेशेन सामानाधिकरण्यं दृष्ट्वा प्रकृतेरपि तदनुमीयते । यथा धूमं दृष्ट्वा वह्निरत्रेति गम्यते । भवति वै प्रत्यक्षादप्यनुमानबलीयस्त्वम्, यथा अलातचक्रं प्रत्यक्षं दृश्यते अनुमानाच्च नैतदस्तीति गम्यते ।

लक्षणहेत्वोः क्रियायाः ।।३।२।१२६।। क्रियाया गुणे उपसंख्यानम् । तिष्ठन् मूत्रयति । कर्तुश्च लक्षणयोः पर्यायेणाचयोगे उपसंख्यानम् । योऽधीयान आस्ते स देवदत्तः । तत्त्वाख्याने चोपसंख्यानम् । शयाना वर्धते दूर्वा इत्येतत् तिष्ठति क्रियादेर्मूत्रणादिक्रियालक्षणत्वमाश्रित्य प्रत्याख्यातम् ।

ग्लाजिस्थश्च ग्स्नुः ।। ३।२।१३९।। स्नोर्गित्वान्न स्थ ईकारः क्(क्ङि)ङितोरीत्वशासनात् । गुणाभावस्त्रिषु स्मार्यः श्र्युकोऽनिट्त्वं कगोरितोः ।।

शमित्यष्टाभ्यो घिनुण् ।।३।२।१४१।। घिनुणकर्मकाणामित्येतदन्यत्रानभिधानात्प्रत्याख्यातम् ।

स्पृहिगृहिपतिदयिनिद्रातन्द्राश्रद्धाभ्य आलुच् ।। ३।२।१५८ ।। शीङः इति वक्तव्यमिति लुशा सिद्धे आलुज्विधानाज्ज्ञापकादन्यतो विधानमाश्रित्य प्रत्याख्यातम् ।

अन्येभ्योऽपि दृश्यते ।।३।२।१७८।। क्विप् चान्येभ्योऽपि दृश्यत इति सिद्धेऽनुपपदार्थमिदम् ।

यावत्पुरानिपातयोर्लट् ।।३।३।४।। यावत्पुरादिषु लड्विधिर्लुटः पूर्वविप्रतिषेधेनेत्येतदनद्यतन इत्यत्र यावत्पुरानिपातयोर्लडित्येतदनुवृत्त्या प्रत्याख्यातम् ।

अण् कर्मणि च ।।३।३।१२।। इदमपवादविषयेऽनिवृत्त्यर्थमुत्सर्गविषये च प्रतिपद्विधानार्थम् ।

लृट् शेषे च ।।३।३।१३।। अत्र योगविभागेन चः प्रत्याख्यातः ।

भावे ।।३।३।१८।। लिङ्गवचननिर्देशो नान्तरीयकत्वादविवक्षितः ।

अकर्त्तरि च कारके संज्ञायाम् ।।३।३।१९।। पर्युदासेन कारकग्रहणं प्रत्याख्यातम् । सर्वत्र घञो दर्शनात् संज्ञाग्रहणं च प्रत्याख्यातम् । अभिधानलक्षणाः कृत्तद्धितसमासा इत्यनतिप्रसङ्गः ।

परिमाणाख्यायां सर्वेभ्यः ।।३।३।२०।। घञनुक्रमणमजब्विषय इति वक्तव्यम् । अवचने हि स्त्रीप्रत्ययानामप्यपवादविज्ञानमित्येतत्, सर्वेभ्य इत्येतत्, प्रकृत्याश्रयो योऽपवादस्तद्बाधनार्थमित्यर्थाश्रयापवादस्य न बाध इत्याश्रित्य प्रत्याख्यातम् ।

समि मुष्टौ ॥३।३।३६॥ परिमाणाख्यायामिति सिद्धेऽपरिमाणार्थमिदम् ।

यजयाचयतविच्छप्रच्छरक्षो नङ् ॥३।३।९०॥ प्रच्छेर्नङि संप्रसारणप्रतिषेधो वक्तव्य इत्येतत् प्रश्ने चेति निपातनात्प्रत्याख्यातम् ।

ण्यासश्रन्थो युच् ॥३।३।१०७॥ युचश्चकार उदात्त इत्यनुवृत्त्या प्रत्याख्यातः ।

गोचरसंचरवहव्रजव्यजापणनिगमाश्च ॥३।३।११९॥ गोचरादीनामग्रहणं प्रायवचनाद्यथा कषो निकष इत्येतत्प्रत्याख्यातम् ।

उदङ्कोऽनुदके ॥३।३।१२३॥ एतदप्यनर्थकं प्रायवचनात् ।

कर्तृकर्मणोश्च भूकृञोः ॥३।३।१२७॥ कर्तृकर्मग्रहणमुपपदसंज्ञार्थम् ।

वर्त्तमानसामीप्ये वर्त्तमानवद्वा ॥३।३।१३१॥ वर्तमानवद्वचनं शत्राद्यर्थम् । अन्यथा वा लडित्येव वदेत् । वर्त्तमाने विहितस्य लट एव तौ । इष्णुजादिरपि प्रयोजनम् ।

आशंसायां भूतवच्च ॥३।३।१३२॥ संभावनेऽलमित्युक्तेः सर्वत्र सम्भावने आलमर्थ्यं न गम्यत इति ज्ञायते ।

क्षिप्रवचने लृट् ॥३।३।१३३॥ अनिष्पन्ने निष्पन्नशब्दः शिष्योऽनिष्पन्नत्वादित्येतत् हेतुभूतकालसंप्रेक्षितत्वाद्वा सिद्धमिति प्रत्याख्यातम् । अस्त्यर्थानां भवन्त्यर्थे सर्वा विभक्तय इत्येतद्यथा स्वकालं समुच्चारणादित्यनेन प्रत्याख्यातम् ।

भविष्यति मर्यादावचनेऽवरस्मिन् ॥३।३।१३६॥ अक्रियाप्रबन्धार्थमिदम् । क्रियाप्रबन्धार्थत्वे वचनानर्थक्यम् ।

कालविभागे चानहोरात्राणाम् ॥३।३।१३७॥ अनहोरात्राणां तद्विभागे तैश्च विभागे प्रतिषेधः ।

लिङ्निमित्ते लृङ् क्रियातिपत्तौ ॥३।३।१३९॥ साधनातिपत्तावित्यपि वक्तव्यमित्येतत्तत्रापि क्रियातिपत्तिसत्वात्प्रत्याख्यातम् ।

गर्हायां लडपिजात्वोः ॥३।३।१४२॥ इदं प्रत्याख्यातम् । क्रियाया असमाप्तिविवक्षया वर्त्तमाने लडित्येव सिद्धे शतृशानचोश्चेष्टत्वात् ।

अनवक्लृप्त्यमर्षयोरकिंवृत्तेऽपि ॥३।३।१४५॥ किंवृत्तस्यानधिकारादकिंवृत्तेऽपीति प्रत्याख्यातम् । अस्य लटः शत्राद्यभावादतिङिति प्रतिषेधाच्च नोपपदत्वस्य फलम् ।

शेषे लृडयदौ ॥३।३।१५१॥ चित्रीकरणाप्रतीतेरयदाविति प्रत्याख्यातम् ।

विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ् ॥३।३।१६१॥ निमन्त्रणादीनामर्थे चेदुक्तार्थत्वान्निमन्त्रयै भवन्तमिति प्रत्ययानुपपत्तिः । एकार्थत्वाद्द्विवचनाद्यसिद्धिश्च । निमन्त्रणादिषु गम्यमानेषु चेन्निमन्त्रयत इत्यादावप्यापत्तिः । सिद्धन्तु द्वितीयाकाङ्क्षस्य प्रकृते प्रत्ययार्थे प्रत्ययविधानात् । निमन्त्रयै इत्यत्रापि निमन्त्रणमित्याकाङ्क्ष्यते । अस्तु तर्हि निमन्त्रणादीनामर्थे इति ।

योऽसौ द्वितीय आकाङ्क्ष्यते स एव प्रत्ययार्थः । द्विवचनादिसिद्धिश्च सुपां कर्मादय इति न्यायेन । विधिः प्रेषणम् ।

प्रैषातिसर्गप्राप्तकालेषु कृत्याश्च ॥३।३।१६३॥ प्रैषादिषु कृत्यवचनं लोटा बाधा माभूदिति, स्त्र्यधिकारादूर्ध्वं वासरूपविध्यभावस्येदमेव ज्ञापकम् ।

कालसमयवेलासु तुमुन् ॥३।३।१६७॥ प्रथमान्तेष्विति वक्तव्यमित्येतत् कालः पचतीत्येतद्व्यावृत्तयेऽवश्यकर्तव्यतया प्रैषाद्यनुवृत्त्या प्रत्याख्यातम् ।

धातुसम्बन्धे प्रत्ययाः ॥३।४।१॥ यथाकालविधानात् सिद्धमुपपदस्य तु कालान्यत्वमित्यादिनाऽस्य विध्यर्थत्वं प्रत्याख्यातम् ।

क्रियासमभिहारे लोट् लोटो हिस्वौ वा च तध्वमोः ॥३।४।२॥ हिस्वयोरात्मनेपदपरस्मैपदग्रहणं लादेशत्वाभावाय समसंख्यार्थं चेत्येतद्वा च तध्वमोरित्यस्य ज्ञापकत्वमाश्रित्य प्रत्याख्यातम् । सेर्ह्यपिच्चेत्यत्र योगविभागेन यावान् हिर्नाम सोऽपिदित्यर्थेन पित्त्वाभावस्तस्य परत्वादाटि सादृश्यादेश इति पिदाटोः प्रतिषेधो वक्तव्य इति प्रत्याख्यातम् ।

उपसंवादाशङ्कयोश्च ॥३।४।८॥ उपसंवादाशङ्कयोर्लिङ् वक्तव्य इत्याश्रित्य लिङर्थे लेडित्येव सिद्धेरिदं सूत्रं प्रत्याख्यातम् ।

तुमर्थे सेसेनसेअसेन्क्सेकसेनध्यैअध्यैन्कध्यैकध्यैन्शध्यैशध्यैन्तवैतवेङ्तवेनः ॥३।४।९॥ अत्र तुमर्थ इत्युक्ते न कर्त्ता तदर्थः । अनिर्दिष्टार्थत्वाच्च स्वार्थे एव तुमुनित्याश्रित्याव्ययकृतो भाव इत्येतत्प्रत्याख्यातम् ।

समानकर्तृकयोः पूर्वकाले ॥३।४।२१॥ समानकर्तृकयोरनन्त्यस्येति वक्तव्यमित्येतत् सर्वेषां प्रधानक्रियां प्रति पौर्वकाल्यमस्तीति प्रत्याख्यातम् ।

विभाषाग्रेप्रथमपूर्वेषु ॥३।४।२४॥ अप्राप्तविभाषेयम् । अग्रादिषु समासप्रतिषेधो वक्तव्य इत्यमैवेत्येवकारबलेन प्रत्याख्यातम् ।

स्वादुमि णमुल् ॥३।४।२६॥ स्वादुमि मान्तनिपातनमीकाराभावार्थम्, च्व्यन्तस्य च मान्तत्वार्थम् । आच तुमुनः प्रत्यया अनुप्रयोगेण समानाधिकरणे वक्तव्या इत्येतत्तुमर्थे इत्यनुवर्त्योक्तरीत्या तत्सिद्धेनाव्ययकृतो भाव इत्यनेन प्रत्याख्यातम् ।

वर्षप्रमाण ऊलोपश्चास्यान्यतरस्याम् ॥३।४।३२॥ प्रातेः कर्माश्रित्यो लोपश्चान्यतरस्यामित्यंशः प्रत्याख्यातः । विभक्तिश्रवणं त्विष्टमेव ।

करणे हनः ॥३।४।३७॥ हिंसार्थादपि हन्तेः पूर्वविप्रतिषेधेनायमेव । तेन नित्यसमाससिद्धिः ।

कर्तरि कृत् ॥३।४।६७॥ अर्थानादेशे कृतां स्वार्थिकता स्यात्तदर्थमिदम् । ल्युनादीनां कर्त्तरि प्रतिषेधो वाच्यो नानावाक्यत्वादित्येतद् विदेशस्थमपि सदेकं वाक्यं भवति, यथा

द्वितीयस्थलुकश्चतुर्थषष्ठ्योरलुगपवाद इति करणरूपेणार्थेनापवादत्वात् कर्तृरूपार्थस्य बाध इति प्रत्याख्यातम् ।

टित आत्मनेपदानां टेरे ॥३।४।७९॥ आनस्य प्रतिषेधो वक्तव्य इत्येतत्प्रकृतानामात्मनेपदानामित्यनेन प्रत्याख्यातम् ।

परस्मैपदानां णलतुसुस्थलथुसणल्वमाः ॥३।४।८२॥ अकारः शित्कर्तव्य इत्येतदकारप्रश्लेषेण प्रत्याख्यातम् ।

लोटो लङ्वत् ॥३।४।८५॥ जुस्भावस्य प्रतिषेधो वक्तव्य इति लङ इत्यनेन लङ् एव यो लङ् तस्येत्यर्थकेन प्रत्याख्यातम् ।

सेर्ह्यपिच्च ॥३।४।८७॥ हिन्योरुत्वप्रतिषेधो वाच्य इत्येतदिकारोच्चारणेन प्रत्याख्यातम् ।

एत ऐ ॥३।४।९३॥ आड्गुणस्य प्रतिषेधो वाच्यः पचावेदमिति, बहिरङ्गलक्षणत्वादित्येन प्रत्याख्यातम् ।

लिङः सीयुट् ॥ ३।४।१०२॥ यासुडादेः सीयुट्प्रतिषेधो वक्तव्य इति, न वा वाक्यापकर्षादित्यनेन प्रत्याख्यातम् । सियुड्वाक्यस्य यासुड्वाक्येन बाधनादित्यर्थः । अनादेश्च सुड् वक्तव्य इति, न वा तिथोः प्रधानभावात्तद्विशेषणं लिङ्ग्रहणमित्यनेन प्रत्याख्यातम् ।

यासुट् परस्मैपदेषूदात्तो ङिच्च ॥३।४।१०३॥यासुटो ङिद्वचनमुदात्तवचनं च पिदर्थम् ।

आर्धधातुकं शेषः ॥ ३।४।११४ ॥ आर्धधातुग्रहणं कर्त्तव्यमित्येतदातृतीयसमाप्तेर्धातोरेकाचो हलादेरिति प्रकृतो धात्वधिकारोऽनुवर्त्तते इति प्रत्याख्यातम् ।

इति तृतीयोऽध्यायः

—:o:—

ङ्याप्प्रातिपदिकात् ॥ ४।१।१॥ त्यूङ्ग्रहणं कर्त्तव्यमित्येतत्तेस्तद्धितत्वादूङेकादेशस्य सत्वात्प्रत्याख्यातम् । लिङ्गविशिष्टपरिभाषया सिद्धे ङ्याब्ग्रहणं तदन्तात्तद्धितविधानार्थम् ।

स्त्रियाम् ॥ ४।१।३॥ स्तनकेशवती स्त्री स्याल्लोमशः पुरुषः स्मृतः । उभयोरन्तरं यच्च तदभावे नपुंसकम् ॥ लिङ्गात्स्त्रीपुंसयोर्ज्ञाने भ्रुकुंसे टाप् प्रसज्यते । नत्वं खरकुटीः पश्य खट्वावृक्षौ न सिध्यतः ॥ नापुंसकं भवेत्तस्मिन् तदभावे नपुंसकम् । असत्तु मृगतृष्णावद्गन्धर्वनगरं यथा ॥ आदित्यगतिवत्सन्न वस्त्रान्तर्हितवच्च तत् । तयोस्तु तत्कृतं दृष्ट्वा यथाकाशेन ज्योतिषः ॥ अन्योऽन्यसंश्रयं त्वेतत्प्रत्यक्षेण विरुध्यते । तटे च सर्वलिङ्गानि दृष्ट्वा कोऽध्यवसास्यति ॥ संस्त्यानप्रसवौ लिङ्गमास्थेयौ स्वकृतान्ततः । संस्त्याने स्त्यायतेर्ड्रट् स्त्री सूतेः सप् प्रसवे पुमान् । तस्योक्तौ लोकतो नाम गुणो वा लुपि युक्तवत् ॥ स्त्रियाः प्रातिपदिकविशेषणत्वात् स्वार्थे टाबादयः । यद्वा स्त्रियां वाच्यायामिति । द्विवचनादि तु गुणवचनानामाश्रयतो लिङ्गवचनभावात् ।

उगितश्च ॥४।१।६॥ धातोरुगितः प्रतिषेधः अञ्चतेश्चोपसंख्यानमिति उगिदचतिग्रहणात्सिद्धमिति प्रत्याख्यातम् ।

वनो र च ॥ ४।१।७ ॥ बहुव्रीहेरुपसंख्यानं प्रतिषिद्धत्वात् । प्रतिषेधो वोपधालोपिनो वेति वक्तव्यमिति डाबुभाभ्यामिति सूत्रस्थान्यतरस्यांग्रहणेन प्रत्याख्यातम् ।

न षट्स्वस्रादिभ्यः ॥४।१।१०॥ षट्संज्ञानामन्ते लुप्ते टाबुत्पत्तिः कस्मान्न स्यात् । प्रत्याहाराच्चापा सिद्धं दोषस्त्वित्वे तस्मान्नोभौ ॥

डाबुभाभ्यामन्यतरस्याम् ॥ ४।१।१३ ॥ अन्यतरस्यामित्येतत् डाप् प्रतिषेधाभ्यामुक्ते ङीन्नौ यथा स्यातामिति ।

अनुपसर्जनात् ॥४।१।१४॥ इदमनर्थकं प्रातिपदिकेन तदन्तविधिप्रतिषेधात् । ज्ञापकं तु पूर्वत्र तदन्ताप्रतिषेधस्य, अतिधीवरीति । अप्रधानमुपसर्जनमिति, पूर्वसूत्रनिर्देशो वापिशलमधीते इति । स्त्रियामिति वर्त्तते तेनाणं विशेषयिष्याम इति एतत्प्रयोजनाभावः । प्रधानेन तदन्तविधिर्यथा स्यादित्यर्थमिदमिति भाष्यम् । पूर्वत्र तदन्तविधिर्भवतीति ज्ञापितेऽपि फलाभाव इत्याशयः ।

टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः ॥ ४।१।१५ ॥ ढस्य सानुबन्धकस्योपसंख्यानमित्येतदननुबन्धकढशब्दस्य स्त्रियामवृत्तेः प्रत्याख्यातम् ।

यञश्च ॥४।१।१६॥ आपत्यग्रहणं कर्त्तव्यमित्यकारप्रश्लेषेण प्रत्याख्यातम् ।

प्राचां ष्फ तद्धितः ॥४।१।१७॥ पित्करणसामर्थ्यादप्रातिपदिकत्वेऽपि ङीष्सिद्ध्या तद्धितग्रहणं प्रत्याख्यातम् ।

अपरिमाणविस्ताचितकम्बल्येभ्यो न तद्धितलुकि ॥४।१।२२॥ परिमाणान्तादेव तद्धितलुकि ङीप् । ततो विस्तादिभ्यो नेत्याश्रित्यैको नञ् प्रत्याख्यातः ।

विभाषा सपूर्वस्य ॥४।१।३४॥ उपसर्जनसमासे उपसङ्ख्यानम् । सिद्धं तु पत्युः प्रातिपदिकविशेषणत्वात् ।

पूतक्रतोरै च ॥४।१।३६॥ सन्नियोगशिष्टानामन्यतरापाये उभयोरप्यभावः ।

पुंयोगादाख्यायाम् ॥४।१।४८॥ तस्येदमिति तद्धितस्य वा लुग्वाच्यः । तद्धितविकल्पेऽपि लुगावश्यकः । नह्यन्तरेण तद्धितलुकं परार्थे शब्दो वर्त्तते । सोऽयमित्यभिसंबन्धमाश्रित्येदं प्रत्याख्यातम् ।

ऊङुतः ॥४।१।६६॥ ऊङि दीर्घोच्चारणं ब्रह्मबन्धूरित्यादावुकारद्वयविधानेन शेषलक्षणकप्बाधनार्थम् ।

आवट्याच्च ॥४।१।७५॥ अन उपधालोपिन ऊधसो ङीष् पूर्वविप्रतिषिद्धमिति तत्र तदनुवृत्त्या प्रत्याख्यातम् । आवट्यायञः ष्फश्चापः पूर्वप्रतिषेधेनेति, प्राचां ष्फ इत्यत्र सर्वत्र ग्रहणापकर्षेण प्रत्याख्यातम् ।

अणिञोरनार्षयोर्गुरूपोत्तमयोः ष्यङ् गोत्रे ॥४।१।७८॥ उत्तमशब्दोऽव्युत्पन्नं प्रातिपादिकं त्रिप्रभृतीनामन्त्ये वर्त्तते । षष्ठ्या निर्देशादादेशपक्षो न्याय्यः ।

गोत्रावयवात् ॥४।१।७९॥ कुलाख्याभ्यो लोके गोत्राभिमताभ्यः ष्यङर्थमिति भारद्वजीयाः, अथवा अनन्तरापत्यार्थम् ।

समर्थानां प्रथमाद्वा ॥४।१।८२॥ समर्थवचनमनर्थकं न ह्यसमर्थेनार्थाभिधानम् । वावचनमनर्थ-

कमेकार्थाभावे नित्यत्वात्प्रत्ययस्य । कृतवर्णानुपूर्वीकादुत्पत्त्यर्थं समर्थवचनम्[1] । वावचनमपि नित्येषु शब्देषु वाक्यस्य साधुत्वान्वाख्यानार्थम् ।

स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात् ॥४।१।८७॥ "वत्यर्थे प्रतिषेधो वाच्य" इत्येतत् स्त्रीपुंवच्चेतिनिर्देशेन योगापेक्षज्ञापकेन प्रत्याख्यातम् ।

द्विगोर्लुगनपत्ये ॥४।१।८८॥ द्विगोर्लुकि तन्निमित्तग्रहणं कर्तव्यम् । अर्थविशेषाऽसंप्रत्ययेऽतन्निमित्तादपीति वक्तव्यम् । तत्र सम्बन्धे षष्ठीत्याद्यं प्रत्याख्यातम् । अनभिधानाश्रयेणान्त्यं प्रत्याख्यातम् ।

गोत्रेऽलुगचि ॥४।१।८९॥ भूम्नि प्राप्तस्य लुको यदजादौ तद्धितेऽलुकं शास्ति । एतद् ब्रवीति कुर्वन्, समानकालावलुग्लुक्[2] च ॥

यूनि लुक् ॥४।१।९०॥ अत्राप्यचीति विषयसप्तमी ।

तस्यापत्यम् ॥४।१।९२॥ तद्धितार्थनिर्देशे लिङ्गवचनमप्रमाणं तस्याविवक्षितत्वात् । सर्वनाम[3]निर्देशे विशेषासंप्रत्ययः सामान्यनिर्देशात् । सामान्यचोदनास्तु विशेषेषु । सामान्यवाचिन उत्पत्त्यसंभवाद्विशेषादुत्पत्तिः । अपत्यमिति च प्रजनो विवक्षितः । स च सर्वलिङ्गः । एकार्थे

---

१ न ह्यसमर्थादुत्पद्यमानेन प्रत्ययेनार्थाभिधानं स्यादित्येवंप्रकारेण भाष्ये पूर्वं "समर्थवचनं" प्रत्याख्याय पश्चादन्ते सौत्थितिः, वैक्षमाणिः—इत्येतत्साधनार्थमवस्थापितम् । कैयटेन चैतौ प्रयोगौ अन्तरङ्गपरिभाषया संसाध्य समर्थवचनम् अकृतव्यूहपरिभाषाज्ञापनार्थं, "तेन पपुषः, तस्थुष इत्यादि सिद्धं भवती"त्युक्तम् । पश्चाच्च स्वत एव कैयटेन पपुषः, तस्थुष इति प्रयोगौ प्रकारान्तरेण साधितौ । अतो ज्ञायते यत् कैयटमते समर्थवचनमनर्थकम् । नागेशोऽपि "सूत्रे न्यायसिद्धाऽर्थानुवाद एव समर्थग्रहणमिति भाष्याशयः" इति वदति । न च नागेशस्यापि मते अकृतव्यूह-परिभाषाज्ञापनार्थमेव समर्थवचनमस्त्विति वाच्यम्, लघुशब्देन्दुशेखरे तस्मिन्निति सूत्रे "अकृतव्यूहपरिभाषा त्वनित्या नास्त्येव वा" इति स्वयं कण्ठोक्तत्वेन तज्ज्ञापने नागेशस्यानादरात् । तेन ज्ञायते यदेतन्मतेऽपि नास्ति सप्रयोजनकं समर्थवचनम् । एवञ्चोभयविधटीकादिपर्यालोचनेनावगम्यते यदन्ते समर्थवचनसमर्थकं भाष्यं न सिद्धान्तिसम्मतम् । ततश्च "कृतवर्णानुपूर्वीकादुत्पत्त्यर्थं समर्थवचनम्" इति मूलमेकदेश्युक्तित्वेनासाधकं मन्दप्रयोजनं वेति केचित् ।

२ भाष्ये समानकालत्वं विहायान्यथापि समाधानात् एतत्कथनं प्रायिकम् ।

३ सर्वनामनिर्देश इत्यस्याभिप्रायः सामान्यनिर्देशे ।

शब्दान्यत्वाद् दृष्टं लिङ्गान्यत्वमवयवान्यत्वाच्च । यथा पुष्यः, तारका, नक्षत्रं, कुटी[1], कुटीर इति च ।

एको गोत्रे ॥४।१।९३॥ उत्पादयितारं प्रत्यपत्ययोगादिदमारब्धम् । तत्र प्रत्ययान्ताद्गोत्रे प्रतिषेधः । परमप्रकृतेश्चोत्पत्तिर्वक्तव्या । सर्वेष्वपत्ययुक्तेषु प्रत्ययान्तात्प्रतिषेधो वक्तव्यः । यावद् ब्रूयात्प्रथमो गोत्रे तावदेको गोत्र इति ।

बाह्वादिभ्यश्च ॥४॥१॥९६॥ बाह्वादिप्रभृतिषु येषां दर्शनं गोत्रभावे लौकिके ततोऽन्यत्र तेषां प्रतिषेधः । सम्बन्धिशब्दानां तत्सदृशात्प्रतिषेधः ।

सुधातुरकङ् च ॥४॥१॥९७॥ व्यासवरुडेत्यादिप्रकृत्यन्तराण्येवैतानि ।

मातुरुत्संख्यासंभद्रपूर्वायाः ॥४॥१॥११५॥ स्त्रीलिङ्गनिर्देशः, संमिमीते संमाता तदपत्ये मा भूदिति ।

स्त्रीभ्यो ढक् ॥४॥१॥१२०॥ सर्वेष्वेव स्त्रीग्रहणेषु प्रत्ययग्रहणम् ।

गोत्रस्त्रियाः कुत्सने ण च ॥४॥१॥१४७॥ पुंवत्त्वप्रतिषेधार्थं णस्य णित्वम्, गार्गीभार्य इति । "गोत्राद्यून्यस्त्रियामि"ति वचनादप्रयोजनम् । नास्ति गार्गी । अवंश्यत्वाद्वा स्त्रियाः प्रयोजनम् । न स्त्री वंश्या । अस्ति गार्गी स्त्री । अपर आह मातृवंश्यस्यापि सत्त्वान्नास्ति गार्गी ।

अपत्यं पौत्रप्रभृति गोत्रम् ॥४॥१॥१६२॥ यस्यापत्यं विवक्ष्यते तस्य पौत्रप्रभृतीति वक्तव्यमिति । प्रथमादित्यनुवर्त्य समर्थानां प्रथमस्य यदपत्यं पौत्रप्रभृतीत्याश्रित्य प्रत्याख्यातम् ।

जीवति तु वंश्ये युवा ॥४॥१॥१६३॥ पौत्रप्रभृत्यपेक्षं चेति वक्तव्यमिति । पौत्रप्रभृतीत्यनुवर्त्य पौत्रप्रभृतेर्यदपत्यमित्यर्थाश्रयणेन प्रत्याख्यातम् ।

जनपदशब्दात्क्षत्रियादञ् ॥४॥१॥१६८॥ क्षत्रियादेकराजात्सङ्घप्रतिषेध इति । नह्यन्तरेण बहुषु लुकं पञ्चाला इति भवति । ततश्च युवप्रत्यय एव, तस्य च लुक् । तस्मिंश्चालुग्भविष्यतीति प्रत्याख्यातम् ।

तेन रक्तं रागात् ॥४।२।१॥ अरागादनभिधानेन प्रत्ययानुत्पत्तिसिद्धेः रागादिति प्रत्याख्यातम्[2] ।

---

१ कुटी, कुटीर इति "अवयवान्यत्वाच्च" इति वार्तिकस्योदाहरणे । "शब्दान्यत्वाद्" इत्यस्य च "पुष्य" इत्याद्युदाहरणानि । एवञ्च भाष्यवार्तिकद्वयं प्रत्याख्यानसंग्रहकर्त्रा सम्मेलितमेकत्र लाघवादिति प्रतीयते ।

२ अत "एतस्य (रागादित्यस्य) अभावे कर्तृतृतीयान्तादपि प्रत्ययः स्यादिति भावः"—इति तत्त्वबोधिनीव्याख्यासंवलितं-सिद्धान्तकौमुदीटिप्पण्यां वासुदेवशर्मोक्तं चिन्त्यम् । यत एतद् प्रत्याख्यानं भाष्यसम्मतं, कैयटनागेशादिभिश्चानुमोदितम् ।

संज्ञायां श्रवणाश्वत्थाभ्याम् ॥४।२।५॥ श्रवणा रात्रिरित्यत्र विभाषा फाल्गुनीश्रवणाकार्तिकीति निपातनान्न युक्तवत् ।

परिवृतो रथः ॥४।२।१०॥ तदेकान्तग्रहणं कर्त्तव्यमित्यनभिधानात्प्रत्याख्यातम् ।

पाण्डुकम्बलादिनिः ॥४।२।११॥ मत्वर्थीयेन सिद्धिमाश्रित्येदं प्रत्याख्यातम् ।

सास्मिन्पौर्णमासीति ॥४।२।२१॥ संज्ञायामिति वक्तव्यमिति इतिकरणेन प्रत्याख्यातम्[1] ।

कस्येत् ॥४।२।२५॥ इकरोच्चारणसामर्थ्यान्न यस्येति लोपः[2] ।

कालेभ्यो भववत् ॥४।२।३४॥ कालेभ्य इति वक्तव्यमिति वतिबलेन प्रत्याख्यातम् ।

भिक्षादिभ्योऽण् ॥४।२।३८॥ भिक्षादिषु युवतिग्रहणानर्थक्यं पुंवद्भावस्य सिद्धत्वात् प्रत्ययविधौ ।

ब्राह्मणमाणववाडवाद्यन्[3] ॥४।२।४२॥ यन्ननुवृत्त्या सिद्धे यन्ग्रहणमन्यतोपि । तेन पृष्ठादुपसंख्यानं न कार्यम् ।

पाशादिभ्यो यः ॥४।२।४९॥ वाताच्छैब्ग्र इति वक्तव्यम् । पृथग्वातादर्शनेन समूहासंभवात् । अथवा पृथग्वाता अपि दृश्यन्ते ।

क्रतूक्थादिसूत्रान्ताट्ठक् ॥४।२।६०॥ तस्येदं प्रत्ययस्य च लुग्वक्तव्य इत्यविर विकन्यायेन प्रत्याख्यातम् ।

अनुब्राह्मणादिनिः ॥४।२।६२॥ मत्वर्थीयेनिना सिद्धिमाश्रित्येदं प्रत्याख्यातम् ।

वसन्तादिभ्यष्ठक् ॥४।२।६३॥ तादर्थ्यात्ताच्छब्द्यम् ।

प्रोक्ताल्लुक् ॥४।२।६४॥ प्रोक्तादितिवक्तव्ये सौत्रो निर्देशः ।

---

१ अत एव सिद्धान्तकौमुद्याम् "इतिशब्दात् संज्ञायामिति लभ्यते" इत्युक्तम् ।

२ एतद् भाष्योक्तं समाधानं परित्यज्य निर्मूलं कैयटाभिप्रायञ्चानुसृत्य सिद्धान्तकौमुद्यां "लोपात् परत्वादादिवृद्धिः" इत्येवमुक्तं समाधानं न मनोरमम् ।

किञ्च कैयटेन स्वटीकायां "परत्वाद् वृद्ध्या लोपो बाध्यते" इत्यस्य "श्रायम्" इत्युदाहरणमुपन्यस्तं, न तु "कस्येत्" इति सूत्रस्य । परं सिद्धान्तकौमुद्याम् "कस्येत्" इति सूत्रस्यैव तदुदाहरणत्वेनोपन्यस्तम् । तच्चिन्त्यम् । दीक्षितमहोदयस्य "लोपात् परत्वादादिवृद्धिः, यथा श्रायम्" इत्यभिप्रेतं स्यात् ।

३ सिद्धान्तकौमुदीस्थः "यन्" इत्यस्य स्थाने यदिति पाठो भाष्यविरोधादुपेक्ष्यश्चिन्त्यश्च ।

छन्दोब्राह्मणानि च तद्विषयाणि ॥४।२।६६॥ याज्ञवल्क्यादिभ्यः पुराणप्रोक्तेष्वित्यस्य प्रतिषेधस्तुल्यकालत्वात्। तद्विषयता च नेति वक्तव्यम्। काश्यपकौशिकाभ्यामित्यत्र तद्विषयो भवतीति वक्तव्यम्। तच्च पाराशर्यशिलालिभ्यामित्यत्र तद्विषयो भवतीत्यनुवर्तते।

*कत्त्र्यादिभ्यो ढकञ् ॥४।२।९५॥ अत्र ग्रामादित्यनुवर्त्य "ग्रामाच्चेति वक्तव्य"मिति प्रत्याख्यातम्।

कुलकुक्षिग्रीवाभ्यः श्वास्यलङ्कारेषु ॥४।२।९६॥ कुलादपत्ये कुक्षिग्रीवाभ्यां ढञन्ताभ्यां स्वार्थे कनमाश्रित्येदं प्रत्याख्यातम्॥

रङ्कोरमनुष्येऽण् च ॥४।२।१००॥ अमनुष्यग्रहणानर्थक्यं मनुष्यतत्स्थयोर्वुञ्विधानात्। अमनुष्ये मनुष्यस्थे *रूगणोर्ज्ञापकमिति चेन्न, अनिष्टत्वात्। अण्ग्रहणं चानर्थकं, कच्छादिभ्योऽण्विधानादित्यमनुष्येऽणिति प्रत्याख्यातम्।

जनपदतदवध्योश्च ॥४।२।१२४॥ जनपदाज्जनपदावधेर्वुञेवेति नियममाश्रित्य गर्त्तोत्तरपदाच्छविधेर्जनपदाद्वुञ् पूर्वविप्रतिषेधेनेति प्रत्याख्यातम्।

कच्छादिभ्यश्च ॥४।२।१३३॥ साल्वानां कच्छादिषु पाठः प्रत्याख्यातः, अपदातावेव गोयवाग्वोरेव साल्वादिति नियमाश्रयणेन।

तवकममकावेकवचने ॥४।३।३॥ एकार्थग्रहणं कर्त्तव्यमित्येतद् एकवचनशब्दं पारिभाषिकमाश्रित्य प्रत्याख्यातम्।

सर्वत्राण् च तलोपश्च ॥४।३।२२॥ हेमन्तस्याण्वचनमणि च तलोपवचनमनर्थकं हेम्नः प्रकृत्यन्तरत्वात्[1]। तत्र ऋतुभ्य इत्येव सिद्धम्। अलोपदर्शनाच्च पङ्क्तिर्हैमन्तीति।

अभिनिष्क्रामति द्वारम् ॥४।३।८६॥ द्वारस्याचेतनत्वेपि चेतनवदुपचारान्निष्क्रमणमुपपन्नम्। यथा अयमस्य कोणोऽभिनिःसृतः, अयमभिप्रविष्ट इति।

तेन प्रोक्तम् ॥४।३।१०१॥ प्रोक्तग्रहणमनर्थकं तत्रादर्शनात्। यत्र दृश्यते ग्रन्थः स इति तत्र "कृते ग्रन्थ" इत्येव सिद्धम्। नित्यानि छन्दांसीति छन्दोऽर्थमिदं, यद्यप्यर्थो नित्यो, या त्वसौ वर्णानुपूर्वी साऽनित्या। तद्भेदाच्चैतद्भवति। काठकं, कालापकमिति।

कृते ग्रन्थे ॥४।३।११६॥ मक्षिकादिभ्योऽण्। तद्विशेषेभ्यश्चेत्येतत् संज्ञायाम्

---

१ अर्थात् हेमन्तपर्यायो हेमञ्छब्दोऽप्यस्ति।

एवञ्चात्र रूपत्रयं सिध्यति—हैमनम्, हैमन्तम्, छन्दसि "हेमन्ताच्च" इति ठञ्—हैमन्तिकम्। परं काशिकाकारमते "हैमन्तिकम्" इति लोकेऽपि सिद्ध्यतीति वैशिष्ट्यम्।

॥४।३।११७॥ "कुलालादिभ्यो वुञ् ॥४।३।११८॥ इति योगविभागेन[1] प्रत्याख्यातम् ।

अनुदात्तादेश्च ॥४।३।१४०॥ "आद्युदात्तात् ङीष उपसंख्यानम्" इत्येतन्निघाते कृते सूत्रेणैव सिद्ध्या प्रत्याख्यातम् । यावत्येव द्वितीयस्वरस्य प्रादुर्भावस्तावत्येव पूर्वस्य निघातः ।

ञितश्च तत्प्रत्ययात् ॥४।३।१५५॥ दृष्टो ह्यवयवे समुदायशब्दो विकारे च प्रकृतिशब्दस्तस्मान्मयडभावः । विकारावयवशब्दात्त्वनमिधानान्नोत्पत्तिरिति प्रत्याख्यातमिदम् ।

फले लुक् ॥४।३।१६३॥ फले लुग्वचनानर्थक्यं प्रकृत्यन्तरत्वात् ।

———

प्राग्वहतेष्ठक् ॥४॥४॥१॥ माशब्दमाह[2] माशब्दिक इति भाष्ये क्वचित्पाठः । माशब्द इत्याहेत्यर्थं कैयटः ।

चूर्णादिनिः ॥४॥४॥२३॥ मत्वर्थीयेन सिद्धत्वेदं प्रत्याख्यातम् ।

लवणाल्लुक् ॥४॥४॥२४॥ इदमनर्थकं रसवाचित्वात् । असंसृष्टे च दर्शनात्, संसृष्टे चादर्शनात् ।

प्रयच्छति गर्ह्यम् ॥४॥४॥३०॥ तादर्थ्यात्ताच्छब्द्यम्, मे-स्यात्-शब्दलोपो वा ।

शक्तियष्ट्योरीकक् ॥४॥४॥५९॥ यं विधिं प्रत्युपदेशोऽनर्थकः स विधिर्बाध्यते, यस्य तु विधेर्निमित्तमेव नासौ बाध्यते ।

तद्वहति रथयुगप्रासङ्गम् ॥४॥४॥७६॥ वहतीति व्यर्थं तस्येदमित्यनेन सिद्धेः । वहति, वोढेति शब्दभेद इति चेत् अर्थसामान्यात्सिद्धम् । य एवार्थो रथं वहति, स एवार्थो रथस्य वोढेति । लुगभावार्थं तदि[3]ति सिद्धान्तः ।

संज्ञायां जन्याः[4] ॥४॥४॥८२॥ जनीशब्दात्तद्वहतीत्येव सिद्ध इदं सर्वकालसर्वसंख्यप्रत्ययविध्यर्थम्[5] । इदमेव ज्ञापयति पूर्वत्र संख्याकालौ विवक्षितौ ।

---

१ अद्यत्वे सिद्धान्तकौमुद्यादिपुस्तकेषु "संज्ञायाम्" ॥४।३।११७॥ "कुलालादिभ्यो वुञ्" ॥४।३।११८॥ इत्येवं योगविभागरूपेणैव सूत्रमुपलभ्यते । परं भाष्ये योगविभागकरणेन तु ज्ञायते, यत् पूर्वं "संज्ञायां कुलालादिभ्यो वुञि" त्येकमेव सूत्रमासीत् ।

२ भाष्ये प्रत्याख्यानाभावात् प्रत्याख्यानसंग्रहे माशब्देत्यादिकस्य पाठश्चिन्त्यः ।

३ अतः प्रत्याख्यानसंग्रहे पाठश्चिन्त्यः ।

४ सिद्धान्तकौमुद्यां काशिकायामष्टाध्याय्यां च संप्रति "जन्या" इति विसर्गरहित एव पाठो दरीदृश्यते ।

५ अतः प्रत्याख्यानसंग्रहे पाठश्चिन्त्यः ।

विध्यत्यधनुषा ॥४॥४॥८३॥ अकरणेनेति वाच्यमित्यनभिधानात्प्रत्याख्यातम् ।

इति चतुर्थोऽध्यायः ॥

प्राक् क्रीताच्छः ॥५॥१॥१॥ "विभाषा हविरि"ति वावचनादपवादविषये छनिवृत्त्याधिकारात्सिद्धिरिति प्राक्क्रीतादिति प्रत्याख्यातम् ।

कम्बलाच्च संज्ञायाम् ॥५॥१॥३॥ "अपरिमाणविस्ताचितकम्बल्येभ्य" इति परिमाणे निपातनमाश्रित्येदं प्रत्याख्यातम् ।

खलयवमाषतिलवृषब्रह्मणश्च ॥५॥१॥७॥ "वृषन्ब्राह्मणयोरुपसंख्यानमि"त्येतद् अविरविकन्यायेन प्रत्याख्यातम् ।

आत्मन्विश्वजनभोगोत्तरपदात्खः ॥५॥१॥९॥ "समानाधिकरण" इत्यन्यत्रानभिधानात्प्रत्याख्यातम् ।

तदर्थं विकृतेः प्रकृतौ ॥५॥१॥१२॥ "तदर्थमिति कृत्यनामभ्यष्ठञि"ति "प्रयोजनमि"त्येव सिद्धिमाश्रित्य प्रत्याख्यातम् ।

छदिरुपधिबलेर्ढञ्[1] ॥५॥१॥१३॥ यः प्रकृत्युपमर्देन भवति तत् (सः) यच्च तदेव गुणान्तरयुक्तं तत् च[2] विकारः । औपधेये तु वचनात् स्वार्थिकः ।

संख्याया अतिशदन्तायाः कन् ॥५॥१॥२२॥ "डतेश्चेति वक्तव्यम्" इत्यर्थवद्ग्रहणपरिभाषया प्रत्याख्यातम् । अन्वयव्यतिरेकमूलकस्य काल्पनिकार्थवत्वस्य प्रत्ययमात्रेपि सत्त्वात् ।

वतोरिड्वा ॥५॥१॥२३॥ "कन् इति वक्तव्यमि"त्येतत् प्रकृतानुवृत्त्या प्रत्याख्यातम् ।

अध्यर्धपूर्वद्विगोलुगसंज्ञायाम् ॥५॥१॥२८॥ द्विगोर्लुकि यद्वक्तव्यं तद् "द्विगोर्लुगनपत्ये" इत्यत्रोक्तम् । संज्ञाप्रतिषेधानर्थक्यं च तन्निमित्तत्वाल्लोपस्य । तद्धितलुकं विना द्विगोः संज्ञात्वाभावात् । "अध्यर्धग्रहणं" चानर्थकं संख्यासंज्ञायां तदुपसंख्यानात् ।

तेन क्रीतम् ॥५॥१॥३७॥ "करणादिति वाच्यम् ।" "अकर्त्रैकान्तादिति वाच्यम्" । "संख्याया इति वक्तव्यं द्विगोश्चेति वाच्यम्" । "परिमाणस्य संख्याया यदेकवचनं तदन्तादिति वक्तव्यमि"त्येतत्सर्वमन्यत्रानभिधानात्प्रत्याख्यातम् ।

तस्य[3] निमित्तं संयोगोत्पातौ ॥५॥१॥३८॥ संयोगो नाम इदं कृत्वेदमवाप्यते इति। यादृच्छिको भेदश्छेदो वा पद्मं वा पर्णं वोत्पातः ।

---

१ मूले प्रमादात् परित्यक्तमिदं सूत्रं ग्रन्थसंगत्या पुनर्विलिख्यतेऽस्माभिः ।

२ चकारोऽप्यर्थः ।

३ प्रत्याख्यानादर्शनात् प्र० संग्रहे पाठश्चिन्त्यः ।

तदस्मिन् वृद्ध्यायलाभशुल्कोपदा दीयते ॥५॥१॥४७॥ "अस्मा इति च वक्तव्यमि"ति "यत् यस्मै दीयते तस्मिन्नपि तद्दीयते" इत्याश्रित्य प्रत्याख्यातम् ।

पूरणार्धाट्ठन् ॥५॥१॥४८॥ "अनन्तादुपसंख्यानमि"ति स्वार्थिकत्वादनोपि पूरणार्थत्वमाश्रित्य प्रत्याख्यातम् ।

कुलिजाल्लुक्खौ च ॥५॥१॥५५॥ अत्र लुक्खग्रहणानर्थक्यं पूर्वस्मिन्निकभावात् ।

तदस्य परिमाणम् ॥५॥१॥५७॥ "जीवितपरिमाणे चोपसंख्यानमि"ति कालात् "तमधीष्ट" इत्यनेन सिद्धिमाश्रित्य प्रत्याख्यातम् । कालशब्दश्च यो यः काले वर्तते, स कालशब्दः। रमणीयादिषु नातिप्रसङ्गोऽनभिधानात् ।

पङ्क्तिविंशतित्रिंशच्चत्वारिंशत्पञ्चाशत्षष्टिसप्तत्यशीतिनवतिशतम् ॥५॥१॥५९॥ "अनारम्भो वा प्रातिपदिकविज्ञानाद्यथा सहस्रादिषु" । नासूया कर्त्तव्या यत्रानुगमः क्रियते । समुदाये विंशत्यादयः । सङ्घे इति वर्त्तते । सङ्घः समुदायः समूह इत्यनर्थान्तरम् । समुदायवचनाः सन्तो भाववचना भवन्ति । भावो धर्मः । भाववचनाः सन्तो गुणवचना भवन्ति । कदाचित् गुणगुणिनोः सामानाधिकरण्यम् । विंशतिर्गावः, शुक्लः पट इतिवत् । कदाचिद् गुणिना गुणो विशेष्यते । गवां विंशतिः, पटस्य शुक्ल इतिवत् । विंशत्यादयः स्वभावात् आश्रयगतलिङ्गसंख्याऽग्राहिणः । गोविंशतिरानीयतामित्युक्ते द्रव्यानयनं तु भावानयनस्यासंभवादव्यतिरेकाद्वा ।

छेदादिभ्यो नित्यम् ॥५॥१॥६४॥ पन्थो ण नित्यम् ॥५।१।७६॥ "नित्य-" ग्रहणमनर्थकं वाक्यस्येष्टत्वात् । "सन्नियोगशिष्टानामन्यतरापाये उभयोरप्यभाव" इति न विकारेण विग्रहः ।

तमधीष्टो भृतो भूतो भावी ॥५।१।८०॥ "अधीष्टभृतयोश्चतुर्थीनिर्देशः कर्त्तव्य" इत्येतत्तादर्थ्यात्ताच्छब्द्येन प्रत्याख्यातम् ।

अवयवसि ठंश्च ॥५।१।८४॥ चेनानन्तरस्य ण्यतोऽनुकर्षो द्रष्टव्यः ।

षष्टिकाः षष्टिरात्रेण पच्यन्ते ॥५।१।९०॥ "षष्टिके संज्ञाग्रहणमि"त्येतदनभिधानेन प्रत्याख्यातम् ।

तत्र च दीयते कार्यं भववत् ॥५।१।९६॥ कार्यग्रहणमनर्थकं तत्र भवेन कृतत्वात् । योगविभागार्थं तर्हीति भाष्यकारः ।

ऐकागारिकट् चौरे ॥५।१।११३॥ एकागारान्निपातनानर्थक्यं ठञ्प्रकरणात् ।

तेन तुल्यं क्रिया चेद्वतिः ॥५।१।११५॥ "स्त्रीपुंसाभ्यां वत्युपसंख्यानमि"ति[1] "स्त्रीपुंवच्चे"ति निर्देशेन योगापेक्षेण ज्ञापकेन प्रत्याख्यातम् ।

---

१ एतद् वार्तिकं भाष्ये "उपसर्गाच्छन्दसि धात्वर्थे" इति सूत्रे विद्यते ।

तस्य भावस्त्वतलौ ॥५।१।११९॥ "स्त्रीपुंसाभ्यां वा त्वतलौ वक्तव्या" वित्येतत् "आ च त्वे"ति चेन नञ्समावेशार्थेन प्रत्याख्यातम्। अभिप्रायादिषु नातिप्रसङ्गोऽनभिधानात्। एवं "यस्य गुणस्य भावादि"त्यादिवार्तिकद्वयं प्रत्याख्यातम्।

विभाषा तिलमाषोमाभङ्गाणुभ्यः ॥५।२।४॥ तिलादिभ्यः खञ् चेति वक्तव्यमित्येतत् शणसप्तदशानि धान्यानीत्याश्रित्य प्रत्याख्यातम्।

पक्षात्तिः ॥५।२।२५॥ "मूल इति वक्तव्यमि"ति "एकयोगनिर्दिष्टानामेकदेशोप्यनुवर्त्तत" इत्याश्रित्य प्रत्याख्यातम्।

किमः संख्यापरिमाणे डति च ॥५।२।४१॥ "बहुष्विति वक्तव्यमि"त्येतत् द्व्येकयोः परिप्रश्नाभावात्प्रत्याख्यातम्।

संख्याया अवयवे तयप् ॥५।२।४२॥ "अवयविनीति वक्तव्यमि"ति "अस्ये-"त्यनुवृत्त्या प्रत्याख्यातम्।

संख्याया गुणस्य निमाने मयट् ॥५।२।४७॥ "गुणिनीति वक्तव्यमि"ति "अस्ये-"त्यनुवृत्त्या प्रत्याख्यातम्। "भूयस इति वक्तव्यमि"त्यनभिधानात्प्रत्याख्यातम्। "एकश्चेदन्यतर इति वक्तव्यमि"ति "गुणस्ये"त्येकत्वविवक्षया प्रत्याख्यायम्। "समानामिति वक्तव्यमि"-त्यनभिधानात्प्रत्याख्यातम्। येनाधिगम्यते तन्निमानं, यदधिगम्यते तन्निमेयम्।

तस्य पूरणे डट् ॥५।२।४८॥ "संख्यापूरणे इति वक्तव्यमि"ति 'संख्याया' इत्यनुवृत्त्य, प्रत्याख्यातम्। अथवा "यस्य भावादन्यसंख्यात्वं तत्रे"ति "चरम उपजाते पूर्वस्मिंश्चानपगत" इति च लक्ष्यासिद्ध्यादिना प्रत्याख्यातम्।

नान्तादसंख्यादेर्मट् ॥५।२।४९॥ "अस्यादिर्भवतीति वक्तव्यमि"त्यनुवृत्त "डट्" इत्यस्य षष्ठ्या विपरिणामेन प्रत्याख्यातम्।

बहुपूगगणसङ्घस्य तिथुक् ॥५।२।५२॥ "बह्वादिषु लिङ्गविशिष्टादुत्पत्तिर्वक्तव्या", "पुंवत्त्वं च वक्तव्यमि"त्येतत् लिङ्गविशिष्टपरिभाषया, "भस्याऽढे तद्धिते, सिद्धश्च प्रत्ययविधा-" वित्याभ्यां प्रत्याख्यातम्।

मतौ छः सूक्तसाम्नोः ॥५।२।५९॥ "अनेकपदादपीति वक्तव्यमि"ति "स्वं रूपं शब्दस्ये"ति वचनादर्थवत्त्वेन समुदायस्य प्रातिपदिकत्वमाश्रित्य प्रत्याख्यातम्। आम्नायशब्दानामनुकरणादान्यभाव्यं स्वरवर्णानुपूर्वीदेशकालनियतत्वादिति।

तावतिथं ग्रहणमिति लुग्वा ॥५।२।७७॥ अत्र "लुग्वा"वचनमनर्थकं महाविभाषाप्रकरणात्।

शृङ्खलमस्य बन्धनं करभे ॥५।२।७९॥ "शृङ्खलवदिति निर्देशः कार्यो बतेष्ठक् च वक्तव्य" इत्येतत् शृङ्खलसहचरिते बन्धने शृङ्खलशब्दवृत्त्या प्रत्याख्यातम् ।

श्रोत्रियँश्छन्दोऽधीते[1] ॥५।२।८४॥ "वाक्यार्थे पदवचनं" यद्वा "छन्दसः श्रोत्रभावस्तदधीत इति घंश्च" ।

श्राद्धमनेन भुक्तमिनिठनौ ॥५।२।८५॥ "समानकालग्रहणं कर्त्तव्यमि"त्येतदनभिधानात्प्रत्याख्यातम् ।

क्षेत्रियच् परक्षेत्रे चिकित्स्यः ॥५।२।९२॥ अत्रापि वाक्यार्थे पदवचनं, परक्षेत्रशब्दाच्चिकित्स्य इत्यर्थे घः परलोपो वा ।

तदस्यास्त्यस्मिन्निति मतुप् ॥५॥२॥९४॥ "भूमनिन्दाप्रशंसासु"इत्याद्यनभिधानादितिकरणाच्च भूमाद्यभावेपि यवमतीभिरद्भिरित्यादौ मतुब्दर्शनाच्च प्रत्याख्यातम् ।

रसादिभ्यश्च ॥५॥२॥९५॥ एभ्य इनिठनोरपि दर्शनात् "तदस्य"इत्यनेन मतुप्सिद्धेश्चेदं प्रत्याख्यातम् ।

प्राणिस्थादातो लजन्यतरस्याम् ॥५॥२॥९६॥ "प्राण्यङ्गादिति वक्तव्यम्"-इत्यनभिधानात्प्रत्याख्यातम् ।

अत इनिठनौ ॥५॥२॥११५॥ "एकाक्षरात्कृतो जातेः सप्तम्यां च न तौ स्मृतौ"-इत्यनभिधानेन प्रत्याख्यातम् ।

आलजाटचौ बहुभाषिणि ॥५॥२॥१२५॥ "कुत्सित इति वक्तव्यम्"इति नानायोगकरणसामर्थ्यात् प्रत्याख्यातम् ।

एतदोऽन् ॥५॥३॥५॥ अत्रानकारः । अ अ इति प्रश्लिष्टनिर्देशेन प्रत्याख्यातम् । "एतदस्थम उपसंख्यानम्"इत्येतदेतदस्थकारादावादेशविधानाज्ज्ञापकात्तत्सिद्धिमाश्रित्य प्रत्याख्यातम् । इदमो विहिते थकारादावेतदः इत् इत्यादेश इत्यर्थः ।

पञ्चम्यास्तसिल् ।।५।।३।।७।। "तसेश्च"इत्यत्र "समानशब्दानां प्रतिषेधो वक्तव्यः" तस्मात्तस्यति[2] । पञ्चम्यन्तात्परस्य स्वार्थे वर्त्तमानस्य तसिलादेश इत्यर्थेन प्रत्याख्यातम् ।

तदो दा च ।।५।।३।।१९।। "तदो दावचनमनर्थकम्" "सर्वैकान्य"इत्यनेन विहितत्वात् ।

तयोर्दार्हिलौ च च्छन्दसि[3] ।।५।।३।।२०।। तयोरिति प्रातिपदिकनिर्देशः ।

एनँबन्यतरस्यामदूरे पञ्चम्याः ।।५।।३।।३५।। "अपञ्चम्या इति प्रागसेः" ।

---

१ प्रत्याख्यानाभावात् प्र० सं० पाठश्चिन्त्यः ।

२ अतोग्रे "इत्येतत्" इत्यध्याहार्यम् ।

३—४ प्रत्याख्यानाकरणादनयोरत्र पाठश्चिन्त्यः ।

संख्याया विधार्थे धा ।।५।।३।।४२।। धात्वर्थपृथग्भावे इति वक्तव्यमिति विधशब्दस्य प्रकारार्थत्वेन प्रत्याख्यातम् ।

एकाद्धो ध्यमुञन्यतरस्याम् ।।५।।३।।४४।। "सहभावे ध्यमुञ् वक्तव्यः" इत्येतद् यदनेकमेकं क्रियते सोऽप्यधिकरणविचाल इत्याश्रित्य प्रत्याख्यातम् ।

पूरणाद्भागे तीयादन् ॥५॥३॥४८॥ तीयस्याऽपूरणस्याऽभावेऽप्युत्तरार्थं पूरणादिति ।

एकादाकिनिच्चाऽसहाये ॥५॥३॥५२॥ "असहायस्यैकशब्द आदेश"इत्येतदसहाय-वाच्येकशब्देन प्रत्याख्यातम् ।

अतिशायने तमबिष्ठनौ ॥५॥३॥५५॥ गुणप्रकर्षे इति वक्तव्यमिति गुणस्यैव प्रकर्षसंभवात्प्रत्याख्यातम् । समानगुणत्वे एव स्पर्धादर्शनादनभिधानाच्च समानगुणग्रहणं कर्त्तव्यमिति प्रत्याख्यातम् । अदूरविप्रकर्षे एव स्पर्द्धासत्त्वाद् अदूरविप्रकर्षे इति प्रत्याख्यातम् । जननेन प्राप्यस्य जातिपदार्थस्य प्रकर्षाद्यभावात् ज्ञातेर्न इति प्रत्याख्यातम् । आतिशायिकान्ता-दातिशयिको न अनभिधानात् । न खल्वपि बहूनां प्रकर्षे तरपा भवितव्यं, केन तर्हि, तमपेत्यत्र-स्यभाष्याद् बहुषु पुत्रेष्वेतदुपपन्नं भवति, अयं मे ज्येष्ठोऽयं मे कनीयानिति भाष्याभ्यां तरप न, ईयसुन् तु भवत्येवेति लभ्यते ।

द्विवचनविभज्योपपदे तरबीयसुनौ ॥५॥३॥५७॥ "द्व्यर्थोपपद इति वाच्यम्" इत्येतद् द्विवचनशब्दं यौगिकमाश्रित्य प्रत्याख्यातम् । "एकद्रव्यस्योत्कर्षापकर्षयोरुपसंख्यानम्"इति गुणयोगादेकस्याप्यन्यत्वं स्वीकृत्य प्रत्याख्यातम् ।

प्रशंसायां रूपप् ॥५॥३॥६६॥ 'तिङ्प्रकृते रूपपोऽम्वक्तव्यः" इत्येतत् क्रियाप्रधानत्वेन प्रत्याख्यातम् ।

अव्ययसर्वनाम्नामकच् प्राक् टेः[१] ॥५॥३॥७१॥ "कविधेस्तमादयः पूर्वविप्रतिषेधेन"। "कदा चिच्छिन्नकतरादयः" । "एकदेशिसमासश्च कविधेः पूर्वविप्रतिषेधेन" । "उत्तरपदार्थप्रधानश्च समासः कविधेः पूर्वविप्रतिषेधेन संज्ञायां कन् विध्यर्थम्" । "कदाचिद् द्वन्द्वः कात्पूर्वविप्रतिषेधेन"।

कुटीशमीशुण्डाभ्यो रः ॥५॥३॥८८॥ अत्र "प्रत्ययसंनियोगेन पुंवद्वचनम्"-इत्येतत्स्वार्थिकेषु लिङ्गवचनातिक्रममप्याश्रित्य प्रत्याख्यातम् ।

वत्सोक्षाश्वर्षभेभ्यश्च तनुत्वे ॥५।।३।।९१।। "कार्श्ये प्रतिषेधो वक्तव्यः" इत्येतद यस्य गुणस्य भावाद् द्रव्ये शब्दनिवेशस्तद्गुणतानवे प्रत्ययमाश्रित्य प्रत्याख्यातम् ।

किंयत्तदो[२] निर्धारणे द्वयोरेकस्य डतरच् ॥५॥३॥९२॥ "किमादीनां द्विबह्वर्थे प्रत्ययविधानादुपाध्यानर्थक्यम्" अपरआह—"वा बहूनाम्"इत्यत्र बहुग्रहणमनर्थकम् ।

---

१ प्रत्याख्यानाकरणादस्य पाठश्चिन्त्यः ।

२ तदोर्—इत्येवं पाठोऽशुद्ध एव क्वचिद् दृश्यते ।

अभिजिद्विदभृच्छालावच्छिखावच्छमींवदूर्णावच्छ्रमदणो यञ् ॥५॥३॥११८॥ "अणो गोत्राद्गोत्रे इति वक्तव्यम्" इत्यत्र गोत्रादयं स्वार्थिको गोत्रमेवेत्याश्रित्य गोत्रे इति प्रत्याख्यातम् ।

पादशतस्य संख्यादेर्वीप्सायां वुन् लोपश्च ॥५॥४॥१॥ पादशतग्रहणमनर्थकमन्यत्रापि दर्शनात् ।

न सामिवचने ॥५॥४॥५॥ "एतत्प्रतिषेधानर्थक्यं प्रकृत्यभिहितत्वात्" ।

कृभ्वस्तियोगे संपद्यकर्त्तरि च्विः ॥५॥४॥५०॥ "समीपादिभ्य उपसंख्यानम्" इत्येतत् तात्स्थ्यात्ताच्छब्द्यन्यायेन समीपादीनां तत्स्थपरत्वात्प्रत्याख्यातम् ।

अदणोऽदर्शनात् ॥५॥४॥७६॥ अप्राण्यङ्गादित्युक्त्वाऽदर्शनादिति प्रत्याख्यातम् ।

॥ इति पञ्चमोध्यायः ॥

अजादेर्द्वितीयस्य ॥६॥१॥२॥ अजादेरिति कर्मधारयात्पञ्चमीत्याश्रित्य द्वितीयस्येति प्रत्याख्यातम् ।

पूर्वोऽभ्यासः ॥६॥१॥४॥ द्वयोरिति वक्तव्यमिति द्वे इत्यनुवृत्तस्य विभक्तिविपरिणाममाश्रित्य प्रत्याख्यातम् ।

उभे अभ्यस्तम् ॥६॥१॥५॥ अत्र सहेति वक्तव्यमिति समुदाये वाक्यपरिसमाप्तिन्यायेन प्रत्याख्यातम् ।

जक्षित्यादयः षट् ॥६॥१॥६॥ सप्तग्रहणं कर्त्तव्यमिति जक्षिति पृथक् पदमाश्रित्य प्रत्याख्यातम् ।

तुजादीनां दीर्घोऽभ्यासस्य ॥६॥१॥७॥ अनारम्भो वा छन्दसि दीर्घत्वस्याशक्यपरिच्छेदत्वात् ।

लिटि धातोरनभ्यासस्य ॥६॥१॥८॥ अभ्यासप्रतिषेधानर्थक्यं छन्दसि वावचनात् । नोनूयतेर्नोनावेत्यत्रादोषात् । छन्दसि वा द्वे भवत इत्युच्यते । धातुग्रहणेनापि नार्थः, सस्वांसो विश्र्ण्विरे इत्यादौ वावचनेनादोषात् । तदेतद्धातुग्रहणं सान्यासिकं तिष्ठतु तावदिति ।

ष्यङः संप्रसारणं पुत्रपत्योस्तत्पुरुषे ॥६॥१॥१३॥ उत्तरपदयोरिति तत्पुरुष इत्यनेन पूर्वपदोत्तरपदयोः सन्निधापनात्प्रत्याख्यातम् । प्रत्ययग्रहण इति परिभाषा अनुपसर्जनस्त्रीप्रत्यये न । तत्राप्रत्ययस्थे प्रतिषेधः । निर्दिश्यमानस्येति वा सिद्धम् । अनन्त्यविकारेऽन्त्यसदेशस्य वा । अन्त्यसदेशानन्त्यसदेशयोर्युगपत्समवस्थितावेवैषा ।

ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च ॥६॥१॥१६॥ वयिग्रहणं वेञः प्रतिषेधात् । न वा यकारप्रतिषेधो ज्ञापकोऽप्रतिषेधस्य । यकारप्रतिषेधः

पित्यभ्यासार्थ इति चेन्न, अविशेषेण प्रतिषेधो, निवृत्तं तत्र कितीति, वेञः पित्सु संप्रसारणानिष्टेः। ववौ, ववियेति । विकृतिग्रहणे प्रकृतिग्रहणाभावाच्च ।

लिट्यभ्यासस्योभयेषाम् ॥६॥१॥१७॥ ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनामविशेषः सूत्रारम्भानारम्भयोः । उभयेषां ग्रहणमेषामभ्यासस्य सम्प्रसारणमेवेत्यर्थकम् । तेन "अभ्यासस्य संप्रसारणं हलादिशेषात्पूर्वविप्रतिषेधेन"इति प्रत्याख्यातम् । "संप्रसारणं तदाश्रयं च बलीयो भवति" इति च ।

स्वापेश्चङि ॥६॥१॥१८॥ ङितीत्यनुवृत्त्या चङ्ग्रहणं प्रत्याख्यातम् ।

न वशः ॥६॥१॥२०॥ "यङीति वक्तव्यम्" इति यङीत्यनुवृत्त्या प्रत्याख्यातम् ।

न संप्रसारणे सम्प्रसारणम् ॥६॥१॥३७॥ समानाङ्गग्रहणं कर्त्तव्यम् । न वा यस्याङ्गस्य संप्रसारणप्राप्तिस्तस्मिन् प्राप्तिप्रतिषेधात् । असिद्धत्वाद्बहिरङ्गस्य वसुसंप्रसारणस्यान्तरङ्गः प्रतिषेधो न भविष्यति ।

वश्चास्यान्यतरस्यां किति ॥६॥१॥३९॥ अत्र वश्चास्यग्रहणं शक्यमकर्त्तुम् ।

आदेच उपदेशेऽशिति ॥६॥१॥४५॥ उपदेशग्रहणं प्रातिपदिकानामात्वाभावार्थं[1] । धातोरिति निवृत्तम् । मीनातिमिनोतीत्यत्रैज्ग्रहणानुवृत्त्या परनिमित्तकानामात्वाभावज्ञापनाच्चेतेत्यत्र न दोषः ।

मीनातिमिनोतिदीङां ल्यपि च ॥६॥१॥५०॥ उपदेशिवद्भावो वक्तव्यो णघञ्युज्विध्यर्थम् । उपदेश इति च विषयसप्तमी । एतदुपदेश[2] इत्यनुवर्त्य पूर्वत्र प्रकृतिविशेषणस्यात्र विषयविशेषणत्वमाश्रित्य प्रत्याख्यातम् ।

सृजिदृशोर्झल्यमकिति ॥६॥१॥५८॥ "सङीति वक्तव्यम्"इत्येतद् धातोः स्वरूपग्रहणे[3]"इत्याश्रित्य प्रत्याख्यातम् ।

शीर्षंश्छन्दसि ॥६॥१॥६०॥ शीर्षन् इति प्रकृत्यन्तरमाश्रित्येदं प्रत्याख्यातम् ।

पद्दन्नोमास्हृन्निशसन्यूषन्दोषन्यकञ्छकन्नुदन्नासञ्छस्प्रभृतिषु॥६॥१॥६३॥ अशस्प्रभृतिष्वपि दर्शनात् शस्प्रभृतिष्विति प्रत्याख्यातम् ।

धात्वादेः षः सः ॥६॥१॥६४॥ सुब्धातुष्ठिवुष्वष्कतीनां प्रतिषेध इत्यत्र सुब्धातुग्रहणं

---

१ "उद्देशश्च प्रातिपदिकानां नोपदेशः" इत्यत्रैव सूत्रे भाष्यकृता स्पष्टीकृतम् ।

२ अत्रैतच्छब्देन "उपदेशिवद्भावो वक्तव्यो ण, घञ्, युज् विध्यर्थम्"इत्येतत् परामृश्यते ।

३ अतोग्रे "तत्प्रत्ययविज्ञानात् सिद्धम्" इत्यंशः प्रपूरणीयः ।

सूत्रे[1] धातुग्रहणं चोपदेशे इत्यनुवृत्त्या प्रत्याख्यातम्। ष्ठिवुष्वष्कती यादी स्वीकृत्य तद्ग्रहणमपि प्रत्याख्यातम्।

लोपो व्योर्वलि ॥६॥१॥६६॥ "क्ष्मायुपसंख्यानम्" इत्येतत् लोपो व्योर्वलि, वेः, अपृक्तस्येति योगविभागेन प्रत्याख्यातम्। व्रश्चादिष्वतिप्रसङ्गश्चोपदेशसामर्थ्याद् वारितः। वृश्चतीत्यादौ तु न चारितार्थ्यम्, बहिरङ्गसंप्रसारणस्यासिद्धत्वेन पूर्वं[2] प्राप्तवलोपस्य सामर्थ्येनैव वारणात्। उपक्रमोक्तमस्य वलादिप्रत्ययनिमित्तत्वं तु "अतिप्रसङ्गो व्रश्चादिषु" इति वार्तिकविरोधादेकदेश्युक्तिरिति बोध्यम्। वलोपाप्रसिद्धिरूड्भाववचनात्। व्रश्चादिषु चातिप्रसङ्गः। उपदेशसामर्थ्यात्सिद्धम्, अनारम्भो वा पुनर्वलोपस्य न्याय्य इति।

वेरपृक्तस्य ॥६॥१॥६७॥ दर्विजागृव्योः प्रतिषेधः, धात्वन्तस्य च प्रतिषेधो वक्तव्य इति अनुनासिकवकारकविशब्दस्य ग्रहणात्प्रत्याख्यातम्, सौत्रमपृक्तग्रहणं च।

एङ्ह्रस्वात्सम्बुद्धेः ॥६॥१॥६९॥ "इतरादिभ्यः प्रतिषेधो वक्तव्यः" इत्येतत् अदो ड्डित्वेन प्रत्याख्यातम्।

शेश्छन्दसि बहुलम् ॥६॥१॥७०॥ अयं योगः पूर्वसवर्णेन सिद्धिमाश्रित्य प्रत्याख्यातः। छन्दसि नपुंसकस्य पुंवदित्यनेन नुमो निवृत्तिः। जसादिषु छन्दोवावचनाद् गुणाभाव इति।

संहितायाम् ॥६॥१॥७२॥ औपश्लेषिकेऽधिकरणे सप्तमी। उपश्लेषश्चाव्यवहितयोरेवेतीदं सूत्रं प्रत्याख्यातम्।

आङ्माङोश्च ॥६॥१॥७४॥ सानुबन्धकनिर्देशफलम् आङो गतिकर्मप्रवचनीयसंप्रत्ययार्थः, माङः प्रतिषेधसंप्रत्ययार्थः। आ छायेति स्मरणद्योतके। प्रमा छन्द इति। मेति प्रतिषेधार्थकमव्ययमप्रामाणिकम्[3]।

वान्तो यि प्रत्यये ॥६॥१॥७९॥ "ओकारौकारयोरिति वक्तव्यमिति" वान्तग्रहणाकरणेन प्रत्याख्यातम्। क्षय्यजय्यावित्यत्रोभयतो नियमाश्रयणात् चेयमित्यादौ न दोषः।

एकः पूर्वपरयोः ॥६॥१॥८४॥ अत्रैकग्रहणं प्रत्याख्यातम्।

अन्तादिवच्च ॥६॥१॥८५॥ अन्तादिवद्वचनमामिश्रस्यादेशवचनादिति वार्तिकम्। अतएव न स्थानिवत्त्वेन सिद्धिः। आनुमानिकादेशकल्पकं वाक्यं तु पूर्वपरघटितसमुदायस्यैकादेशघटित आदेश इत्येव, नतु तयोः समुदाययोः प्रत्येकं स्थानित्वबोधकमिति

---

१ "धात्वादेः षः सः" इति सूत्र इत्यर्थः।

२ पूर्वप्राप्तेति पाठो मनोरमः स्यात्।

३ मा इति प्रतिषेधार्थकमव्ययम्। अत्र सूत्रे गृह्यते इति नव्योक्तम् अप्रमाणम्, एतत्सूत्रभाष्यविरोधात्, इत्युद्योताशयः।

वार्तिकाशयः। तत्र पूर्वपरयोरित्यनुवृत्त्या पूर्वस्य कार्यं प्रत्यन्तवत्, परस्य कार्यं प्रत्यादिवत् भवति। "उभयत आश्रये नान्तादिवत्" इति लोकन्यायेन प्रत्याख्यातम्। द्वयोस्तुल्यबलयोरेकः प्रेष्यो द्वयोः पर्यायेण कार्यं करोति। यदा तमुभौ युगपत्प्रेषयतो, नानादिक्षु च कार्ये, तदाऽविरोधार्थी उभयोर्न करोतीति। "वर्णाश्रये च विधौ नान्तादिवद्" इत्यस्य नवाऽताद्रूप्यातिदेशादिति प्रत्याख्यातम्।

षत्वतुकोरसिद्धः ॥६॥१॥८६॥ शास्त्रासिद्धत्वाश्रयणादादेशलक्षणप्रतिषेध उत्सर्गलक्षणस्य च सिद्धिरन्यथा देवदत्तहन्तृहतन्यायेनोत्सर्गलक्षणासिद्धिः। "संप्रसारणङीट्सु सिद्ध एकादेश" इति पूर्वपदान्तपरपदाद्योरेकादेशस्यासिद्धत्वेन प्रत्याख्यातम्।

एत्येधत्यूठ्सु ॥६॥१॥८९॥ "इणीकारादौ प्रतिषेधो वाच्यः" इति एत्येधत्योः ऊठीति योगविभागेनैचीत्यस्यैत्येधतिभ्यां सम्बन्धेन प्रत्याख्यातम्।

आटश्च ॥६॥१॥९०॥ चेन "उस्योमाङ्क्ष्वाटः पररूपप्रतिषेधो वक्तव्यः" इति प्रत्याख्यातम्।

उपसर्गादृति धातौ ॥६॥१॥९१॥ "ऋति ह्रस्वादुपसर्गाद् वृद्धिः पूर्वविप्रतिषेधेन" इत्येतद् धातावित्येतत्सामर्थ्याद्योगविभागेन नियममाश्रित्य प्रत्याख्यातम्।

औतोऽम्शसोः ॥६॥१॥९३॥ "ओतस्तिङि प्रतिषेधः" इति सुपीत्यधिकारात्प्रत्याख्यातम्। वेति निवृत्तम्। एकयोगेऽप्येकदेशानुवृत्तेर्दर्शनात्। "अम्युपसंख्यानम्" आत्वस्यानवकाशत्वात्प्रत्याख्यातम्।

उस्यपदान्तात् ॥६॥१॥९६॥ लक्षणप्रतिपदोक्तपरिभाषया सिद्धेऽपदान्तादिति अतो गुणे इत्युत्तरार्थम्।

नाम्रेडितस्यान्त्यस्य तु वा ॥६॥१॥९९॥ नित्यमाम्रेडिते डाचि पररूपं वक्तव्यम्। अकारान्तानुकरणाद्वा। अच्छब्दान्तानुकरणे तु विचित्रास्तद्धितवृत्तय इति न ततस्तद्धित उत्पद्यते।

संप्रसारणाच्च ॥६॥१॥१०८॥ "समानाङ्गग्रहणं कर्त्तव्यम्" इति सिद्धमसप्रसारणत्वादिति प्रत्याख्यातम्।

अतो रोरप्लुतादप्लुते ॥६॥१॥११३॥ "अकारहशोः समानपदे प्रतिषेधो वक्तव्यः" इति "न वा बहिरङ्गलक्षणत्वाद्" इति प्रत्याख्यातम्।

प्लुतप्रगृह्या अचि नित्यम् ॥६॥१॥१२५॥ नित्यग्रहणेन "सिन्नित्यसमासयोः" इति[2] प्रत्याख्यतम्।

---

१ लोकन्यायश्च क इत्याशङ्कायामाह—द्वयोस्तुल्यबलयोरित्यादि।

२ "सिन्नित्यसमासयोः शाकलप्रतिषेधः" इति वार्तिकमिति भावः।

इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च ॥६॥१॥१२७॥ अत्र ह्रस्वविधानसामर्थ्यात् प्रकृतिभावे सिद्धे तदनुकर्षणार्थश्चः प्रत्याख्यातः ।

ऋत्यकः ॥६॥१॥१२८॥ "उपसर्गाद् वृद्धिर्ऋति ह्रस्वाद्विप्रतिषेधेन" इत्युपसर्गादृतीति सूत्रस्थधातुग्रहणेन प्रत्याख्यातम् ।

सुट् कात्पूर्वः ॥६॥१॥१३५॥ अत्र कात्पूर्वग्रहणं प्रत्याख्यातम्, सर्वतः सुटोऽन्तरङ्ग[1]-तरकत्वात् ।

विष्किरः शकुनौ वा ॥६॥१॥१५०॥ "वि[2]किरो वेति वक्तव्यम्" इत्येतद् विष्किरः शकुनौ वा निपात्यते इत्यर्थाश्रयणेन प्रत्याख्यातम् ।

आश्चर्यमनित्ये ॥६॥१॥१४७॥ "अद्भुते" इति वक्तव्यमिति अनित्यग्रहणेन प्रत्याख्यातम् ।

अनुदात्तं पदमेकवर्जम् ॥६॥१॥१५८॥ "तवै चान्तश्च युगपत्" "रिक्ते विभाषा"-इत्याभ्यां यौगपद्यपर्याययोरभावज्ञापनमाश्रित्यैतत्प्रत्याख्यातम् ।

सावेकाचस्तृतीयादिर्विभक्तिः ॥६॥१॥१६८॥ सप्तमीबहुवचनस्य ग्रहणम् "त्वन्मदोः प्रतिषेधो वक्तव्यः" इत्येतत् "सिद्धं तु यस्मात्तृतीयादिविभक्तिस्तस्याभावात्सौ" इति[3] प्रत्याख्यातम् ।

उदात्तयणो हल्पूर्वात् ॥६॥१॥१७४॥ "उदात्तहल इति वक्तव्यम् वाक्पत्नीत्याद्यर्थम्" इत्येतत् "हल्पूर्वान्नोड्धात्वोः" इति नकारान्तरप्रश्लेषेण प्रत्याख्यातम् । हल्पूर्वादिति बहुतितवेत्यर्थम् ।

नामन्यतरस्याम् ।।६।।१।।१७७।। "मतौ ह्रस्वान्तादिति वक्तव्यम्" इति मतौ ह्रस्वादित्यनुवृत्त्या प्रत्याख्यातम् ।

तास्यनुदात्तेन्ङिद्दुपदेशाल्लसार्वधातुकमनुदात्तमन्ह्विङोः[4] ।।६।।१।।१८६॥ अर्थवता व्यपदेशिवद्भावः ।

---

१ भाष्ये "विप्रतिषेधेन सुट्" इति कृत्वा प्रत्याख्यानात्, अत्र "अन्तरङ्गतरकत्वात्" प्रत्याख्यानं चिन्त्यम् ।

२ "विष्किरः शकुनौ विकिरो वा" इति भाष्यवार्तिकम् । काशिकायामत्र सूत्रे "विकिरः" इति पदप्रवेशो मुधैव, विनाऽपि तेन भाष्यरीत्यैव कार्यसिद्धेः ।

३ "इति" अर्थात् इत्यनेन ।

४ प्रत्याख्यानादर्शनाद अस्य पठनं चिन्त्यम् ।

अचः कर्तृयकि ॥६॥१॥१९५॥ "रपर उपसंख्यानम्"[1] "उपदेशवचनाद्वा सिद्धम्"[2] तच्चात्र तास्यनुदात्तेदित्यतोऽनुवर्तते । जनादीनामात्वेप्यनुदात्तोपदेशेत्यतोऽनुवर्त्तते ।

निष्ठा च द्व्यजनात् ॥६॥१॥२०५॥ "यञि दीर्घत्वे प्रतिषेधः" न वा बहिरङ्गलक्षणत्वात् ।

समासस्य ॥६॥१॥२२३॥ "व्यञ्जनान्तेपूपसंख्यानम्" इत्येतत् "हल्स्वरप्राप्तौ व्यञ्जनमविद्यमानवत्" इत्यनेन प्रत्याख्यातम् ।

तत्पुरुषे तुल्यार्थतृतीयासप्तम्युपमानाव्ययद्वितीयाकृत्याः ॥६॥२॥२॥ "कर्मधारये प्रतिषेधः" इत्येतत् "प्रतिपदोक्तद्वितीयासप्तमीतृतीयासमासग्रहणेन प्रत्याख्यातम् ।

सदृशप्रतिरूपयोः सादृश्ये ॥६॥२॥११॥ सदृशग्रहणमनर्थकं तृतीयासमासवचनात् । षष्ठ्यर्थमिति चेत्तृतीयासमासवचनानर्थक्यम् । यत्र भोजनसदृश इत्यादौ षष्ठ्यर्थो नास्ति तदर्थं तृतीयासमासः । यत्र षष्ठी श्रूयते "दास्याः सदृश" इत्यादौ तदर्थं स्वरोपि वक्तव्यः ।

इगन्तकालकपालभगालशरावेषु द्विगौ ॥६॥२॥२९॥ "यण्गुणयोरुपसंख्यानम्" इति बहिरङ्गपरिभाषया प्रत्याख्यातम् ।

आचार्योपसर्जनश्चान्तेवासी ॥६॥२॥३६॥ अनेकस्य पूर्वपदत्वे सर्वपूर्वपदस्य ग्रहणमिति भाष्यात् पूर्वपदशब्दो न रूढः ।[3]

महान्व्रीह्यपराह्णगृष्टीष्वासजाबालभारभारतहैलिहिलरौरवप्रवृद्धेषु ॥६॥२॥३८॥ "कर्मधारये निष्ठा" इत्येतत् श्रेण्यादिसमास एव । महतः प्रवृद्धशब्दे उत्तरपदे प्रकृतिस्वरत्वविधानात्प्रतिपदोक्तत्वाच्च ।

कुरुगार्हपतरिक्तगुर्वसूतजरत्यश्लीलदृढरूपा पारेवडवा तैतिलकद्रूः[4] पण्यकम्बलो दासीभाराणां च ॥६॥२॥४२॥ "दासीभारादीनामिति वक्तव्यम्" इति बहुवचननिर्देशात्प्रत्याख्यातम् ।

अहीने द्वितीया ॥६॥२॥४७॥ अनुपसर्ग इति वक्तव्यमित्याश्रित्याहीन इति प्रत्याख्यातम् ।

---

१ शङ्का ।

२ समाधानम् ।

३ प्रत्याख्यानाकरणात् अस्यात्र पाठश्चिन्त्यः ।

४ "कद्रूः"—इति सविसर्ग एव पाठः श्रेयान्, कैयटोद्योतयोस्तथैव प्रतिपादनात् काशिकाकौमुद्योस्तु संप्रति प्रायः निर्विसर्ग एव पाठो दृश्यते ।

तादौ च निति कृत्यतौ ॥६॥२॥५०॥ अत्र कृद्ग्रहणानर्थक्यम्[1]। कृदुपदेशे वा तार्थर्थमिडर्थं[2]म्।

बहोर्नञ्वदुत्तरपदभूम्नि ॥६॥२॥१७५॥ नञ्वद्भाव उत्तरपदस्याद्युदात्तार्थः। विदेशस्थमपि यन्नञः कार्यं नञो जरेत्यादितदपि बहोर्यथा स्यादिति।

अलुगुत्तरपदे ॥६॥३॥१॥ उत्तरपद इति किमर्थं, नतराङ्गमनम्। "एकवचालुग्भवति"इति द्विवचनाद्यन्तानामनभिधानेन समासाभावात्प्रत्याख्यातम्। एकवद्वचने "गोषु चरे" "वर्षाभ्यश्च जे" "अपो योनियन्मतिषु चोपसंख्यानम्" "जे चरे च" अतिप्रसङ्गो भवति।

वैयाकरणाख्यायां चतुर्थ्याः ॥६॥३॥७॥ आत्मनेपदपरस्मैपदयोर्निपातनात्सिद्धया इदं सूत्रमात्मनेभाषपरस्मैभाषार्थम्। वैयाकरणाख्येति च कर्मधारयो न्याय्यः।

हलदन्तात्सप्तम्याः संज्ञायाम् ॥६॥३॥९॥ "गोरुपसंख्यानम"इत्येतत् विदादिषु गविष्ठिरेति पाठात्प्रत्याख्यातम्।

तत्पुरुषे कृति बहुलम् ॥६॥३॥१४॥ "अकर्मधारय इति वक्तव्यम्"इति बहुलग्रहणात्प्रत्याख्यातम्। अन्यानि सूत्राणि तु उदाहरणभूयस्त्वं दर्शयितुम्।

देवताद्वन्द्वे च ॥६॥३॥२६॥ "उभयत्र वायोः प्रतिषेधो वक्तव्यः", "ब्रह्मप्रजापत्यादीनां च प्रतिषेधो वक्तव्यः" इति लोकवेदप्रसिद्धद्वन्द्वग्रहणात्प्रत्याख्यातम्। वेदे सहवापनिर्दिष्टानां द्वन्द्वो लोकवेदप्रसिद्धः।

स्त्रि[3]याः पुंवद् भाषितपुंस्कादनूङ् समानाधिकरणे स्त्रियामपूरणीप्रियादिषु ॥६॥३॥३४॥ "गर्भिणीप्रसूतयोरुपसंख्यानं कर्तव्यम्"इति कर्तव्योऽत्र यत्न इति भाष्याशयमाहुः। स्त्रीपदेन च स्त्रीशब्दग्रहणमत्र।

ए[4]कहलादौ पूरयितव्येऽन्यतरस्याम् ॥६॥३॥५९॥ एकहलमुच्चार्य यत्राजुच्चार्यते स एकहलादिः।

इको ह्रस्वोऽङ्यो गालवस्य ॥६॥३॥६१॥ उत्तरपदमात्र इति वक्तव्यमिति अलाबुकर्कन्धुदन्भुफलमित्यत्र पूर्वपूर्वद्वन्द्वपूर्वकषष्ठीतत्पुरुषमाश्रित्य राजदन्तादित्वाच्च दन्भ्वाः परनिपातमाश्रित्य प्रत्याख्यातम्।

खित्यनव्ययस्य ॥६॥३॥६६॥ "ह्रस्वान्तस्य मुम् वक्तव्यः" इति इको ह्रस्व

---

१ शङ्का।

२ समाधानम्।

३ प्रत्याख्यानाकरणात् अत्र पाठश्चिन्त्यः।

४–५ प्रत्याख्यानाकरणात् अत्र संग्रहे पाठश्चिन्त्यः।

इत्यतो ह्रस्वग्रहणं षष्ठ्या विपरिणतमनुवर्त्य प्रत्याख्यातम्। यद्वा नुमि कृते सामर्थ्याद्भूतपूर्वगत्याश्रयणेन प्रत्याख्यातम्।

इच एकाचोऽम्प्रत्ययवच्च ॥६।३।६८॥ "द्वितीयैकवचनवदम्वक्तव्यः" इत्यम्पदे एकशेषेण प्रत्याख्यातम्।

सहस्य सः संज्ञायाम् ॥६।३।७८॥ "सहस्य हलोपवचनम्" इत्येतदाद्युदात्तनिपातनेन प्रत्याख्यातम्।

ग्रन्थान्ताधिके च ॥६।३।७९॥[1] कालोत्तरपदग्रन्थान्तार्थमिदम्।

अषष्ठ्यतृतीयास्थस्यान्यस्य दुगाशीराशास्थास्थितोत्सुकोतिकारकरागच्छेषु ॥६।३।९९॥ "अषष्ठ्यतृतीयास्थस्येति छ-कारकातिरिक्तविशेषणं द्रष्टव्यम्।

अत्वसन्तस्य चाधातोः ॥६।४।१४॥[2] "पित उपसंख्यानम्"। न च पलोपेऽत्वन्तमेव नातुबन्तम्। उकारलोपे अत्वन्तमपि न। भूतपूर्वगत्या तत्त्वेऽतुबन्तत्वमपि। किञ्च सानुबन्धकग्रहणेषु रूपाश्रयणम्। लौकिके प्रयोगे च सानुबन्धकरूपाभावादौपदेशिकं ग्राह्यम्। तत्र चातुबन्तमेवेत्युपसंख्यानमावश्यकम्।

अज्झनगमां सनि ॥६।४।१६॥ "इङो गमेरिति वक्तव्यम्" इति योगविभागेन प्रत्याख्यातम्।

असिद्धवदत्राभात् ॥६।४।२२॥ इदमनेकैरुपायैः प्रत्याख्यातम्। अनेकैरुपायैः प्रत्याख्यानापेक्षया सूत्रारम्भ एव ज्यायानित्याशयेन "आरभ्यमाणेऽप्यस्मिन् योगे" इति। "वुग्युटावुवङ्यणोः" इत्येतत्प्रत्याख्यानप्रकारोऽतिगुरुः।

अनिदितां हल उपधायाः क्ङिति ॥६।४।२४॥ "वृंहेरच्यनिटि" इति वृहिः प्रकृत्यन्तरमिति प्रत्याख्यातम्। अन्यत्रापि लोपदर्शनादजादावप्यदर्शनाच्च प्रकृत्यन्तरमावश्यकम्। "घिनुणि चोपसंख्यानम्" इति त्यजरजेति निपातनाश्रयणेन प्रत्याख्यातम्। "रजनरजकरजःसूपसंख्यानम्"[4] इति कित एते औणादिकाः इत्याश्रित्य प्रत्याख्यातम्।

शास इदङ्हलोः ॥६॥४॥३४॥ "आशासः क्वावुपसंख्यानम्" इत्येतत् क्षियाशीःप्रैषेष्विति निपातनाश्रयणेन प्रत्याख्यातम्।

जनसनखनां सञ्झलोः ॥६।४।४२॥[5] अत्र प्रकरणे उभयोरप्यसिद्धत्वेन समत्वाद्भवत्येव प्रतिषेधः।

---

१ प्रयोजनसत्त्वात् प्र० सं० पाठश्चिन्त्यः।

२—३ प्रत्याख्यानाकरणात् अत्र संग्रहे पाठश्चिन्त्यः।

४ भाष्ये "रजकरजन" इति पाठः।

५ प्रत्याख्यानादर्शनाद् अत्र पाठश्चिन्त्यः।

सनः क्तिचि लोपश्चास्यान्यतरस्याम् ॥६।४।४५॥ इहान्यतरस्यां ग्रहणं प्रत्याख्यातम् । "सनः क्तिचि लोपश्च", "आत्वं च विभाषा" इति ।

णेरनिटि ॥६।४।५१॥ "निष्ठायामेव सेटि" इति नियममाश्रित्य अनिटीति प्रत्याख्यातम् ।

निष्ठायां सेटि ॥६।४।५२॥ इत्यपि प्रत्याख्यातम् ।

घुमास्थागापाजहातिसां हलि ॥६।४।६६॥ "वकारप्रतिषेधो वक्तव्यो घृतं घृतपावान इति दर्शनात्" इति वनिपा प्रत्याख्यातम् । धीवरीति पीवरीति च ध्याप्योः सम्प्रसारणम् ।

एरनेकाचोऽसंयोगपूर्वस्य ॥६।४।८२॥ "असंयोगपूर्वस्य" इत्युच्यमाने उन्न्यावित्यादावनिष्टं प्रसज्येतेति "स्वरपदपूर्वोपधस्येति वक्तव्यम्" इति वार्तिकं धातुना संयोगस्य विशेषणात्प्रत्याख्यातम् । इवर्णविशेषणे तु न फलम् । तत्रेको यणचीति यणः सत्वात् । मणी इत्यादौ तु न दोषः । धात्ववयवसंयोगपूर्वत्वस्य धात्ववयव एव संभवेन तदभाववतोपि तस्यैव ग्रहणात् । संयोगवद्भिप्रयोगस्यापि विशेषावगतिहेतुत्वात् ।

चिण्णमुलोर्दीर्घोऽन्यतरस्याम् ॥६।४।९३॥ "णिज्व्यवेतानां यह्लोपे चोपसंख्यानम्" इत्येतत् दीर्घविधिं प्रति स्थानिवत्त्वनिषेधात्, लोपे कृते चिण्णमुल्परत्वात् प्रत्याख्यातम् ।

घसिभसोर्हलि च ॥६।४।१००॥ "हल्ग्रहणानर्थक्यमन्यत्रापि दर्शनात् ।

हुझल्भ्यो हेर्धिः ॥६।४।१०१॥ "इटः प्रतिषेधो वक्तव्यः" इत्येतन्निर्दिश्यमानपरिभाषया प्रत्याख्यातम् ।

चिणो लुक् ॥६।४।१०४॥ "तस्येति वक्तव्यम्" इत्येतत् तल्लोपस्यासिद्धत्वात् क्ङितीत्यनुवृत्तेर्वा प्रत्याख्यातम् ।

अत एकहल्मध्येऽनादेशादेर्लिटि ॥६।४।१२०॥ "णकारषकारादेरेत्वं लिटि वाच्यम्" इति लिटा आदेशविशेषणेन प्रत्याख्यातम् । "दम्भ एत्वं वक्तव्यम्" इति "श्नसोरल्लोपः" इति तपरकरणेन "असिद्धवत्" इत्यस्यानित्यत्वेन प्रत्याख्यातम् ।

पादः पत् ॥६।४।१३०॥ "पाद उपधाह्रस्वत्वं वक्तव्यमादेशे हि सर्वादेशप्रसङ्गः" इति "न वा निर्दिश्यमानस्यादेशात्" इति प्रत्याख्यातम् । कुमार्यामित्यादौ नद्याः परस्य ङेराम्विधानसामर्थ्यादागमव्यवधानेप्याम् ।

---

१ अत्र सूत्रे नास्ति चकार इति वार्तिकाशयः । स्पष्टञ्चेदमत्रत्यकैयट उद्योते च । काशिकाकौमुद्योस्तु सचकार एव पाठः ।

श्वयुवमघोनामतद्धिते ॥६॥४॥१३३॥ "श्वादीनां संप्रसारणे नकारान्तग्रहणम्" इत्येतदन इत्यपकर्षेण प्रत्याख्यातम्।

आतो धातोः ॥६॥४॥१४०॥ "आतोऽनाप इति वक्तव्यम्" इति सूत्रे योगविभागेन प्रत्याख्यातम्, "क्त्वो ल्यप्" इति निपातनेन च प्रत्याख्यातम्।

मन्त्रेष्वाङ्यादेरात्मनः ॥६॥४॥१४१॥ आदिग्रहणमात इत्यनुवृत्त्या प्रत्याख्यातम्।

ति विंशतेर्डिति ॥६॥४॥१४२॥ अन्त्यस्य तु लोपो न निर्दिश्यमानस्येति परिभाषयेति भाष्यम्। यस्येति लोपेन सिद्धे तिग्रहणमङ्गस्य लोपाभावाय। सूत्रारम्भसामर्थ्यादलोन्त्यस्येत्यस्यानुपस्थितौ सर्वस्य तिशब्दस्य लोपः।

तुरिष्ठेमेयस्सु ॥६॥४॥१५४॥ "सर्वस्य लोपो वक्तव्यः" इति टेरिति सिद्धेऽन्त्यस्य वचनानर्थक्यात्प्रत्याख्यातम्।

इति षष्ठोऽध्यायः ॥

युवोरनाकौ ॥७॥१॥१॥ "धातुप्रतिषेधो भुज्युप्रभृतीनां च प्रतिषेधो वक्तव्यः" इति 'यु वु' इत्यनयोरनुनासिकयोर्निर्देशात्प्रत्याख्यातम्।

आयनेयीनीयियः फढखछघां प्रत्ययादीनाम् ॥७॥१॥२॥ "आयनादिषूपदेशिवद्वचनं स्वरसिद्ध्यर्थम्" इति "अग्राद्यत्, घच्छौ च" इति चित्करणाज्ज्ञापकादुपदेशावस्थायामायनादीन् स्वीकृत्य प्रत्याख्यातम्। "उणादीनां प्रतिषेधो वक्तव्यः" इति "ऋतेरीयङ्वचनान्न धातुप्रत्ययानामादेशाः" इति ज्ञापकेन प्रत्याख्यातम्।

झोऽन्तः ॥७॥१॥३॥ "धात्वन्तप्रतिषेधो वक्तव्यः" इति प्रत्ययपदानुवृत्त्या प्रत्याख्यातम्। प्रत्ययपदं च लुप्तविभक्तिकं भिन्नं पदमिति नैकदेशानुवृत्तिः। "आत्मनेपदेष्वनतः" इति सूत्रेऽनत इति च झकारविशेषणम् "शीङो रुट्" इति चाच्छब्दस्य।

शीङो रुट् ॥७॥१॥६॥ "रुटि दृशिगुणप्रतिषेधो वक्तव्यः" इति अडपवादं छन्दसि दृशेरक्प्रत्ययान्तरं स्वीकृत्य प्रत्याख्यातम्।

बहुलं छन्दसि ॥७॥१॥१०॥ बहुलं छन्दसीति द्विः पठितम्। तत्रैकमनुवृत्त्या प्रत्याख्यातम्।

नेदमदसोरकोः ॥७॥१॥११॥ "इदमदसोः कात्" इत्येव नियमेन सिद्धेर्द्वावपि नञौ प्रत्याख्यातौ।

टाङसिङसामिनात्स्याः ॥७॥१॥१२॥ इनादेशस्येकारः आदित्यत्र दीर्घश्च प्रत्याख्यातः, एत्वसवर्णदीर्घाभ्यां सिद्धेः।

---

१ प्रत्याख्यानाभावात् प्रत्याख्यानसंग्रहे पाठश्चिन्त्यः।

सर्वनाम्नः स्मै ॥७॥१॥१४॥ "अश एकादिष्टात्समायादीनामुपसंख्यानम्" इत्येकादेशस्य बहिरङ्गत्वेन प्रत्याख्यातम् ।

अष्टाभ्य औश् ॥७॥१॥२१॥ "औशनुत्तरपदे इति वक्तव्यम्" इति अष्टपुत्र इत्यादौ औश्यपि लुका सिद्धं षड्भ्यो लुक एवानन्तरस्यायमपवाद इति प्रत्याख्यातम् ।

स्वमोर्नपुंसकात् ॥७॥१॥२३॥ "त्यदादिभ्यश्चेति वक्तव्यम्" इत्यन्तरङ्गानपीति काक्वा आश्रित्य प्रत्याख्यातम् ।

अद्ड् डतरादिभ्यः पञ्चभ्यः ॥७॥१॥२५॥ "अद्भावे पूर्वसवर्णप्रतिषेधो वक्तव्यः" इत्यदो डित्त्वाश्रयणेन प्रत्याख्यातम् ।

युष्मदस्मद्भ्यां ङसोऽश् ॥७॥१॥२७॥ अशः शित्वम् "अ अ" इति प्रश्लिष्टनिर्देशेन प्रत्याख्यातम् । "सर्वे सर्वपदादेशा" इति ज्ञापकसापेक्षम्, एकदेशविकारे हीत्युत्तरार्द्धेन हेतुकथनात् ।

विदेः शतुर्वसुः ॥७॥१॥३६॥ "विदेर्वसोः कित्वं वक्तव्यम्" इति विदेः शतुर्वसुस्, समास इति द्विसकारकनिर्देशेन प्रत्याख्यातम् ।

समासे ऽनञ्पूर्वे क्त्वो ल्यप् ॥७॥१॥३७॥ "ल्यबादेशे उपदेशवचनम्" इति अन्तरङ्गानपि विधीन् बहिरङ्गो ल्यप् बाधते इति प्रत्याख्यातम् । "स्नात्वाकालकादीनां प्रतिषेधो वक्तव्यः" इत्यनञः परस्येत्याश्रित्य प्रत्याख्यातम् ।

श्रीग्रामण्योश्छन्दसि ॥७॥१॥५६॥ श्रीणामिति सर्वविधीनां छन्दसि व्यवस्थितविभाषया सिद्धम् । सूतग्रामणीनामिति समाहारद्वन्द्वे सिद्धमितीदं सूत्रं प्रत्याख्यातम् ।

नेड्यलिटि रधेः ॥७॥१॥६२॥ इटि लिटि रधेरिति नियममाश्रित्य द्वौ नञौ प्रत्याख्यातौ ।

नपुंसकस्य झलचः ॥७॥१॥७२॥ "उगिल्लक्षणप्रतिषेधो वक्तव्यः" इति विप्रतिषेधेनापवादत्वेन वा प्रत्याख्यातम् । "बहूर्जि नुम्प्रतिषेधः" इति च अचः परो यो झल् तदन्तस्य नुमित्यर्थेन प्रत्याख्यातम् । जातिनिर्देशात् काष्ठतक्षीत्यत्रापि भवति ।

शप्श्यनोर्नित्यम् ॥७॥१॥८१॥ सामर्थ्यान्नित्यत्वे नित्यग्रहणं प्रत्याख्यायोक्तम्, "तदेतन्नित्यग्रहणं सान्यासिकं तिष्ठतु तावत्" इति । मन्दबुद्ध्यर्थं तिष्ठत्वित्यर्थः ।

दिव औत् ॥७॥१॥८४॥ "धातुप्रतिषेधो वक्तव्यः" इत्यननुबन्धकपरिभाषया प्रत्याख्यातम् ।

सिचि वृद्धिः परस्मैपदेषु ॥७॥२॥१॥ "ओकारप्रतिषेधो वक्तव्यः" इति विप्रतिषेधेन प्रत्याख्यातम् । पुनः प्रसङ्गाच्च वृद्धौ कृतायामोत्वम् । सौढामित्रौ बहिरङ्गलक्षणत्वात्सिद्धम् ।

एकाच् उपदेशेऽनुदात्तात् ॥७।२।१०॥ "पचादिभ्य इड्वचनम्" इति थलि च सेटीति थलिग्रहणेन प्रत्याख्यातम्। थलि च सेटि किङ्ति च सेटीति तदर्थः। "सनश्चेट्प्रतिषेधः". इत्युपदेशग्रहणस्योभयविशेषणत्वेन प्रत्याख्यातम्। यङ्लोपे पञ्चमी-समासेनाल्लोपस्य स्थानिवत्त्वान्न दोषः। उपदेशश्च स्थान्यादेशयोरुभयोरपि ग्राह्यः।

यस्य विभाषा ॥७।२।१५॥ "अविदेरिति वक्तव्यम्"इति यदुपाधेर्विभाषा तदुपाधेः प्रतिषेध" इति प्रत्याख्यातम्। आदितश्च ॥७।२।१६॥ विभाषा भावादिकर्मणोः ॥७।२।१७॥ इत्यत्र योगविभागश्च "यदुपाधेरित्यादेर्ज्ञापकः।

न वृद्भ्यश्चतुर्भ्यः ॥७।२।५९॥ चतुस्तासि क्लृपिग्रहणानर्थक्यम्। सर्वेभ्यो वृतादिभ्यः प्रतिषेध इष्यते। सादाविति च निवृत्तं परस्मैपदेषु इति च वर्त्तते। क्लृपिग्रहणं चानर्थकं, तस्यापि वृतादिषु पञ्चमत्वात्।

उपदेशेऽत्वतः ॥७।२।६२॥ "घसेः प्रतिषेधो नेति वक्तव्यम्" इति यस्तासावस्ति अनिट् चेत्यर्थाश्रयणेन प्रत्याख्यातम्।

ऋतो भारद्वाजस्य ॥७।२।६३॥ नियमार्थोऽयम्। ऋत एव भारद्वाजस्य नान्यतो भारद्वाजस्येति। अचस्तास्वदित्यत्राप्युपदेश इत्यपकृष्य इति नियमोपपत्तिः।

युष्मदस्मदोरनादेशे ॥७।२।८६॥ अनादेशग्रहणं न कार्यं हलीत्यनुवृत्तेः। तदेतदनादेशग्रहणं तिष्ठतु तावत्सान्यासिकमिति। मन्दबुद्ध्यर्थमिति भावः।

योऽचि ॥७।२।८९॥ अज्ग्रहणं न कार्यम्। यत्वस्योत्सर्गत्वादात्वस्य हलादावपवा-दत्वात्।

शेषे लोपः ॥७।२।९०॥ शेषग्रहणं न कार्यं, लोपस्योत्सर्गत्वात्। 'अजादावात्वस्य हलादौ यत्वस्य चापवादत्वात्' (अजादौ यत्वस्य, हलादावात्वस्य चापवादत्वात्)।

प्रत्ययोत्तरपदयोश्च ॥७।२।९८॥ त्रिचतुरादिष्वर्थग्रहणमुपात्तशब्दविशेषणमेव नत्वङ्गविशेषणम्।

तदोः सः सावनन्त्ययोः ॥७।२।१०६॥ तदोः सः सौ ततोऽदस इत्यदस एवेति नियममाश्रित्यानन्त्ययोरिति प्रत्याख्यातम्। द्वीयतेरप्रत्यये तु यथालक्षणमप्रयुक्ते।

मजेर्वृद्धिः ॥७।२।११४॥ "क्व्यन्तस्य प्रतिषेधो वक्तव्यः" इति धातोः स्वरूपग्रहण इति परिभाषया प्रत्याख्यातम्।

१—२—प्रसङ्गादत्र पाठो न तु प्रत्याख्यानार्थः।

३—५—अप्रत्याख्यानादत्र पाठश्चिन्त्यः।

४—अधोरेखाङ्कितपाठस्थानेऽयं—कोष्ठकान्तर्गतः पाठः संशोध्यावस्थापितोऽस्माभिः।

तद्धितेष्वचामादेः ॥७॥२॥११७॥ "अन्त्योपधालक्षणाप्रतिषेधो वक्तव्यः" इति तक्रकौण्डिन्यन्यायेन सिद्धम्। विषम उपन्यासः। सुश्रुत् सौश्रुत इत्यत्रादिवृद्धेश्चारितार्थ्यात्। तस्मादनुशतिकादिषु पुष्करसच्छब्दपाठो ज्ञापयत्यचामादिवृद्धावन्त्योपधालक्षणा नेति प्रत्याख्यातम्।

देविकाशिंशपादित्यवाड्दीर्घसत्रश्रेयसामात् ॥७॥३॥१॥ "देविकादिषु तदादिग्रहणं कर्त्तव्यम्" इत्याद्यज्विशेषणत्वात्सिद्धम्। "वहीनरस्येत्वं वक्तव्यम्" इति तद्वाचिविहीनरशब्दाश्रयणेन प्रत्याख्यातम्।

न य्वाभ्यां पदान्ताभ्यां पूर्वौ तु ताभ्यामैच् ॥७॥३॥३॥ य्वाभ्यां परस्याऽवृद्धित्वम्, अपवादौ वृद्धेर्हि तौ।

नित्यावैचौ तयोर्वृद्धिः, किमर्थं नेति शिष्यते।
यत्र य्वाभ्यां पराऽवृद्धिस्तत्राध्यश्वेर्यथा न तौ।
अचामादेर्य्वाभ्यां हि तौ कथं द्व्याशीतिके न तौ।
यत्र वृद्धिरचामादेस्तत्रैवावत्र य्वोर्हि सा।
अथ कस्मात्पदान्ताभ्यां, यथेणो न भवेद्यणः।

यथातथयथापुरयोः पर्यायेण ॥७॥३॥३१॥ यथातथायथापुरयोरिति भाष्ये प्रत्याख्यातम्।

हनस्तोऽचिण्णलोः ॥७॥३॥३२॥ "तद्धितप्रतिषेधो वक्तव्यः" इति धातोः स्वरूपग्रहण इत्यनया प्रत्याख्यातम्।

आतो युक् चिण्कृतोः ॥७॥३॥३३॥ कृद्ग्रहणं "ज्ञः स्थालीपाक" इत्यर्थम्।

भस्त्रैषाजाज्ञाद्वास्वानञ्पूर्वाणामपि ॥७॥३॥४७॥ एषाद्वे नञ्पूर्वे अनुदाहरणे, असुप इति प्रतिषेधात्। भस्त्राग्रहणमुपसर्जनार्थम्। नञ्पूर्वग्रहणं चानर्थकम्, उत्तरपदमात्रस्येत्ववचनात्।

अभ्यासाच्च ॥७॥३॥५५॥ "असुप इति वक्तव्यम्" इति यस्मिन्हन्तिरङ्गं तस्मिन् योऽभ्यास इत्यर्थेन प्रत्याख्यातम्।

सन्लिटोर्जेः ॥७॥३॥५७॥ "ज्यः प्रतिषेधो वक्तव्यः" इति प्रतिपदोक्तपरिभाषया प्रत्याख्यातम्।

न क्वादेः ॥७॥३॥५९॥ "क्वादजिव्रजियाचिरूचीनामप्रतिषेधो निष्ठायामनिटः कुत्ववचनात्" इति प्रत्याख्यातमेतत्। शोकसमुद्गयोः शुच्युब्जिभ्यां घञि कुत्वम् अर्के अर्चेरौणादिकः कः।

१—२—प्रत्याख्यानाभावादत्र पाठश्चिन्त्यः।

भुजन्युब्जौ पाण्युपतापयोः ॥७॥३॥६१॥ न्युब्जयतीति न्युब्ज इति न्युब्जयतेः पचाद्यचि सिद्धमिति न्युब्ज उपतापे इति प्रत्याख्यातम् ।

यजयाचरुचप्रवचर्चश्च ॥७॥३॥६६॥ अत्र प्रवचिग्रहणमनर्थकं वचोऽशब्दसंज्ञात्वात् । अह्नि अविवाक्यमिष्यतेऽन्यत्राविवाच्यमिति नोपसर्गनियमार्थमपि तत् ।

भोज्यं भक्ष्ये[1] ॥७॥३॥६९॥ अब्भक्षो वायुभक्ष इति दर्शनान्न भक्षिः खरविशदविषय एव ।

ओतः श्यनि ॥७॥३॥७१॥ ओतः शितीत्याश्रित्य छिद्युक्त्विस्त्यत्र शिद्ग्रहणं न कार्यम् । शमामष्टानामित्यत्रापि शितीत्येवेति तत्र श्यन्ग्रहणमपि न कार्यम् । शमादिपुरस्कारेण विहिते शितीत्यर्थात् भ्रमतु इत्यादौ न दोषः । अष्टानामिति वचनात् तस्यतीत्यादौ न दोषः ।

"इषुगमियमां छः ॥७॥३॥७७॥ "इषेश्छत्वमहलि" इत्येतदचीत्यनुवृत्त्या प्रत्याख्यातम् । अज्रूपे शितीत्यर्थाद् इषाणेत्यादौ न दोषः ।

पाघ्राध्मास्थाम्नादाण्दृश्यर्तिसर्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्छधौशीयसीदाः ॥ "पिबेर्गुणप्रतिषेधो वक्तव्यः" इत्यङ्गवृत्तपरिभाषया वा प्रत्याख्यातम् ।

जुसि च ॥७॥३॥८३॥ "यासुडादेः प्रतिषेधो वक्तव्यः" इत्यचीनुवत्त्या अजादौ जुसीति व्याख्यानेन प्रत्याख्यातम् ।

जाग्रोऽविचिण्णल्ङित्सु ॥७॥३॥८५॥ "जागरयतीत्यत्र गुणे कृते वृद्धिप्रतिषेधो वक्तव्यः" इति चिण्णमुलोः[2] (चिण्णलोः) प्रतिषेधेन गुणनिष्पन्नस्य वृद्ध्यभावज्ञापनात्प्रत्याख्यातम् ।

भूसुवोस्तिङि ॥७॥३॥८८॥ अत्रैकाज्ग्रहणं बोभवतीत्यर्थमिति[3] । अभूदित्यसिद्ध्या बोभूत्वित्यस्य, अत्रैव यङ्लुगन्तस्य गुणनिषेधो नान्यत्रेति नियमेन च प्रत्याख्यातम् ।

अम्बार्थनद्योर्ह्रस्वः ॥७॥३॥१०७॥ "डलकवतीनां प्रतिषेधो वक्तव्यः" इत्येतद् "अम्बार्थं द्व्यक्षरं यदि" इति प्रत्याख्यातम् ।

घेर्ङिति ॥७॥३॥१११॥ "ङीसावधातुके प्रतिषेधो वक्तव्यः" इत्येतत्सुपीत्यनुवृत्त्या प्रत्याख्यातम् ।

याडापः ॥७॥३॥११३॥ "अतिखट्वायेत्यादौ स्थानिवद्भावात्प्राप्तस्य याटः प्रतिषेधो वक्तव्यः" इत्येतत् "ङ्याब्ग्रहणेऽदीर्घः" इत्याश्रित्य प्रत्याख्यातम् । दीर्घत्वे कृते भूतपूर्वगत्याऽऽप्त्वमाश्रित्य तु न याट्, अप्रतिपदोक्तत्वात् । अतिदेशविषये तु तद्वैयर्थ्यापत्त्या नैषा परिभाषा ।

१—प्रत्याख्यानाभावादत्र पाठश्चिन्त्यः ।

२—"चिण्णमुलोः" इति मूलपुस्तकस्य पाठश्चिन्त्यः । "चिण्णलोः" इत्यस्माभिः संशोध्यावस्थापितः ।

३ – बोभवतीति लेट्लकारप्रयोगः "लेटोऽडाटौ" इत्यडागमः ।

इदुद्गुर्थाम्[1] ॥ (७।३।११७॥) औत्[2] ॥ (७।३।११८॥) अच्च घेः ॥ (७।३।११९॥) "अत्वे टापः प्रतिषेधो वक्तव्यः" इति सन्निपातपरिभाषया प्रत्याख्यातम्। ङिदौ-कारकरणाद्वा।

दयतेर्दिगि लिटि ॥७।४।९॥ "साभ्यासस्येति वक्तव्यम्" इत्यनवकाशत्वेन, दिग्या-देशस्य द्विर्वचनबाधकत्वेन प्रत्याख्यातम्। अस्तेः, परत्वात् द्विर्वचने, परस्य भूभावे, पूर्वस्य श्रवणं तु न। आर्धधातुकविषये भूभावविधानेन तस्यान्तरङ्गत्वात्। दयतेरित्यत्र तु लिटीति विषयसप्तमी।

केऽणः ॥७।४।१३॥ "तद्धितग्रहणं कर्त्तव्यं राकेत्यर्थम्" तदुणादीनामव्युत्पन्नत्वात्प्रत्या-ख्यातम्।

आपूज्ञप्यृधामीत् ॥७।४।५५॥ "ज्ञपेरीत्वमनन्त्यस्य" इत्येतत् ज्ञपेर च इत्यर्था-श्रयणेऽप्युभयोः सावकाशत्वेन परत्वादन्त्यस्यापीत्वप्राप्तावपि स्थानिवत्वाद् णिलोपे सिद्धे प्रत्याख्यातम्[3]।

हलादिः शेषः ॥७।४।६०॥ "अजादिर्हल्लुप्यत इति वक्तव्यम्"। संहितया पाठे "अहल्" इति अहल् भवत्यभ्यासः, आदिश्च शिष्यत इत्यर्थेन प्रत्याख्यातम्।

दाधर्त्तिदर्धर्त्तिदर्धर्षिबोभूतुतेतिक्तेऽलर्ष्यापनीफणत्संसनिष्यदत्करिक्रदत्[4]-करिक्रत्कनिक्रदद्भरिभ्रद्दविध्वतोदविद्युतत्तरित्रतः सरीसृपतं वरीवृजन्मर्मृ-ज्यागनीगन्तीति च ॥७।४।६५॥ बोभूत्विति भवतेर्यङ्लुगन्तस्यागुणत्वं निपात्यते। भूसुवोरिति सिद्धे च नियमोऽयम् अत्रैव यङ्लुगन्तस्य गुणो नेति। तेन बोभवतीति सिद्धम्। "तेतिक्ते" इति तिजेर्यङ्लुगन्तादात्मनेपदं निपात्यते। "अनुदात्तङित" इति सिद्धे नियमोऽयम् अत्रैव यङ्लुगन्तस्यात्मनेपदम्। तेन बेभिदीति, चेच्छिदीतीत्यादि सिद्धम्।

इति सप्तमोऽध्यायः॥

सर्वस्य द्वे ॥८।१।१॥ सर्वग्रहणमनर्थकं, पदाधिकारात्। पदस्येति चोत्तरार्थ-मावश्यकम्। अत्र स्थाने द्विर्वचनं द्विःप्रयोगो वेति पक्षद्वयमपि भाष्ये समर्थितम्।

१—२ अच्च घेरित्यत्रानुवृत्त्यर्थोऽत्र पाठो न तु प्रत्याख्यानार्थः।

३ भाष्येऽप्रत्याख्यानादेतत् प्रत्याख्यानं चिन्त्यम्।

४ प्रत्याख्यानाकरणात् अत्र प्र० सं० पाठश्चिन्त्यः। अत्र सूत्रे करिक्रत्-करिक्रदत्—इति प्रयोगद्वयविषये काशिकादिपुस्तकेषु भिन्ना भिन्नाः पाठा उपलभ्यन्ते। क्वचित्प्रयोगद्वयमप्यस्ति। क्वचिदेक एव। क्वचित् कनिक्रदित्यपि।

नित्यवीप्सयोः ॥८॥१॥४॥ सर्वपदगतिग्रहणा नर्थक्यं च, अन्यद्वित्वेऽर्थानभिधानात्। तिङन्ते प्रथमं द्वित्वं पश्चात्तरप्। सुबन्तविषये पूर्वं तरप् पश्चाद् द्वित्वमित्यप्यभिधान स्वाभाव्यात्।

परेर्वर्जने ॥८॥१॥५॥ "असमासे इति वक्तव्यम्" इत्येतत्समासस्य वर्जने वृत्तावपि परेर्वर्जनेऽवृत्तेः, परित्रिगर्तमित्यादौ समासाप्राप्तेः प्रत्याख्यातम्।

पदस्य ॥ (८॥१॥१६॥)

पदात् ॥८॥१॥१७॥ "यणेकादेशस्वरस्तूर्द्ध्वं पदाधिकारात्"। नवा पदाधिकारस्य विशेषणत्वात्। अन्तग्रहणान्नलोपे तस्य विशेषणत्वम्।

तिङ्ङतिङः ॥८॥१॥२८॥ अतिङ् इति व्यर्थं, समानवाक्याधिकारात्।

गतिर्गतौ ॥८॥१॥७०॥ 'गतेरनुदात्तत्वे गतिग्रहणानर्थक्यं, तिङ्यवधारणात्'। तिङि चोदात्तवतीति छन्दोर्थमितिचेन्नागतित्वात्।

सामान्यवचनं विभाषितं विशेषवचने[1] ॥८॥१॥७४॥ अत्रान्यतरत्प्रत्याख्यातम्। अन्यतरेणान्यतराक्षेपात्।

नलोपः सुप्स्वरसंज्ञातुग्विधिषु कृति ॥८॥२॥२॥ संज्ञाविधौ दत्तदण्डिनौ दण्डिदत्ताविस्युदाहरणम् (णे)।

न[२] मु ने ॥८॥२॥३॥ इङ्गेङ्गितेन चेष्टितेन, निमिषितेन, महता वा सूत्रप्रबन्धेनाचार्याणामभिप्रायो लक्ष्यते। एतदेव ज्ञापयति भवत्यत्र नाभाव इति। आवृत्या वा। वृद्धकुमारीवरन्यायेन वा।

उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य ॥८॥२॥४॥ "यणस्वरो यणादेशे सिद्धो वाच्यः"। स्वरितयणः स्वरितार्थमिति योगविभागेन प्रत्याख्यातम्। स्वरितग्रहणाकरणेन वा। उदात्तस्वरितयोरिति सप्तमीमाश्रित्य लौकिके प्रयोगे यः स्वरितस्तत्र परे यो यण् ततः परस्य लक्षणवशादनुदात्तस्य स्वरितः साधुर्भवतीत्यर्थेन वा।

स्वरितो वाऽनुदात्ते पदादौ ॥८॥२॥६॥ उदात्तस्यानुवृत्त्या विधानेन, पक्षे आन्तर्यतः स्वरितसिद्धया स्वरितग्रहणं प्रत्याख्यातम्। "एकादेशस्वरोऽन्तरङ्गः सिद्धो वाच्यः", "अयवायावेकादेशशतृस्वरैकानुदात्तसर्वानुदात्तार्थम्" इति शतुरनुम इत्यत्रानुम इति प्रतिषेधे-

---

१ "नामन्त्रिते समानाधिकरणे सामान्यवचनम्" "विभाषितं विशेषवचने" इति कौमुद्यादिषु पाठः। "नामन्त्रिते समानाधिकरणे", "सामान्यवचनं विभाषितं विशेषवचने" इति भाष्यानुसारिपाठ इति सुधियो विभावयन्तु।

२-३ प्रत्याख्यानाकरणादत्र पाठश्चिन्त्यः।

नैकपदाश्रयैकादेशस्वरस्य सिद्धत्वज्ञापनात्प्रत्याख्यातम् । "प्लुतश्चोत्वे सिद्धो वाच्यः" इत्यप्लुतादप्लुते इत्यस्य करणेनाफलत्वात्प्रत्याख्यातम् । "संयोगादिलोपः संयोगान्तलोपे सिद्धो वाच्यः" इति अपवादो वचनप्रमाण्यादित्याश्रित्य प्रत्याख्यातम् । "निष्ठादेश इड्विधिनिषेधयोः सिद्धो वाच्यः" इत्येतत् प्रत्ययविधौ सिद्धत्वाश्रयणेनेदित्करणेन च प्रत्याख्यातम् । "वस्वादिषु दत्वं सौ दीर्घत्वे सिद्धं वाच्यम्" इति अत्वसन्तस्येत्यत्र अधातोरिति करणेन प्रत्याख्यातम् ।

न लोपः प्रातिपदिकान्तस्य ॥८॥२॥७॥ "अह्नो नलोपस्य प्रतिषेधो वाच्यः" इत्येतद् रूपरात्रिरथन्तरेष्विति ज्ञापकाद् ह्रकाराकारस्य रुत्ववारणेनानवकाशत्वाद्रुत्वस्य लोपबाधकत्वेन प्रत्याख्यातम् ।

न ङिसम्बुद्ध्योः ॥८॥२॥८॥ "उभयसंज्ञान्यपि" इति भत्वमाश्रित्य सौत्रं ङिसम्बुद्ध्योरनुत्तरपदे इतिवार्तिकस्थं च ङिग्रहणं प्रत्याख्यातम् । सम्बुद्ध्यन्तानां समासाभावमाश्रित्य वार्तिकस्थं सम्बुद्धिग्रहणमपि प्रत्याख्यातम् ।

मादुपधायाश्च[1] मतोर्वोऽयवादिभ्यः ॥ (८॥२॥९॥)

रदाभ्यां निष्ठातो नः पूर्वस्य च दः ॥८॥२॥४२॥ "अनन्त्योरपि निष्ठामतुपोरादेशः" इति पदाधिकारस्य विशेषणत्वात्प्रत्याख्यातम् । "नार्मत प्रतिषेधः" इत्यपि बहिरङ्गलक्षणत्वात्प्रत्याख्यातम् । एकदेश्युक्तिरन्त्या ।

अचि विभाषा ॥८॥२॥२१॥ 'णावुपसंख्यानम्' इति "तस्य दोषः" इति लत्वे स्थानिवत्वमाश्रित्य प्रत्याख्यातम् ।

परेश्च घाऽङ्कयोः ॥८॥२॥२२॥ "सञ्चीति प्रकृत्य लत्वसलोपसंयोगादिलोपकुत्वदीर्घत्वानि" इति उदःस्थास्तम्भोरिति ज्ञापकान्निपातनाद्याश्रयणाच्च प्रत्याख्यातम् । परन्त्वनेकज्ञापकनिपातनाद्याश्रयणापेक्षया सञ्चीत्येव लध्विति प्रत्याख्यानमेकदेश्युक्तिरिति परे ।

संयोगान्तस्य लोपः ॥८॥२॥२३॥ "अत्र संयोगादिलोपे च यणः प्रतिषेधः" इति न वा झलोलोपाद्बहिरङ्गलक्षणत्वाद्वेति प्रत्याख्यातम् । "संयोगान्तलोपे सग्रहणम्" इति रुत्वासिद्धया प्रत्याख्यातम् योगविभागेन वा रात्सस्येत्यस्य पुरस्तादपकर्षेण वा रात्सस्येत्यत्र संयोगान्तस्येत्यनुवृत्त्या वा ।

धि च ॥८॥२॥२५॥ "धिसकारे सिचो लोपः" इति चकाधीत्येवाद्गीकारात्प्रत्याख्यातम् ।

दधस्तथोश्च ॥८॥२॥३८॥ अत्र तथोश्चेति प्रत्याख्यातम् । "पूर्वत्रासिद्धे" इति स्थानिवत्वप्रतिषेधात्, आनन्तर्याश्रयणाद्वा ।

---

१ प्रत्याख्यानाकरणात्—रदाभ्यामितिसूत्रवार्तिके मतुप्प्रसङ्गायैवास्यात्र पाठः प्रतिभाति ।

झषस्तथोर्धोऽधः ॥८॥२॥४०॥ "झलां जशोन्ते" इत्यत्र योगविभागेन अध इति प्रत्याख्यातम् ।

रदाभ्यां निष्ठातो नः पूर्वस्य च दः ॥८॥२॥४२॥ "वृद्धिनिमित्तात्प्रतिषेधः" इति "न वा बहिरङ्गलक्षणत्वात्" इति प्रत्याख्यातम् ।

अञ्चोऽनपादाने ॥८॥२॥४८॥ "व्यक्ते प्रतिषेधः" इति "अञ्जिविज्ञानात्सिद्धम्" इति प्रत्याख्यातम् ।

नुदविदोन्दत्राघ्राह्रीभ्योऽन्यतरस्याम् ॥८॥२॥५६॥ "अस्य विधायकत्वपक्षे न ग्रहणं कर्त्तव्यम्"इति प्रकृतसम्बन्धानुवृत्त्या संहितापाठे न्यासे एव नत्वेन वा प्रत्याख्यातम् ।

रोऽसुपि ॥८॥२॥६९॥ "उपसर्जनप्रतिषेधोऽलुकीत्यसुपि" इति प्रसज्यप्रतिषेधमाश्रित्य प्रत्याख्यातम् ।

वसुस्रंसुध्वंस्वनडुहां दः ॥८॥२॥७२॥ "अनडुहो दत्वे नकारप्रतिषेधः" इति सिद्धं तु नुमः प्रतिपद्विधानादिति प्रत्याख्यातम् ।

उपधायां च ॥८॥२॥७८॥ "उपधादीर्घत्वेऽभ्यासजिन्त्रिचतुर्णामुणादीनां च प्रतिषेधः" इति स्थानिवद्भावादुणादीनामव्युत्पन्नत्वात्, सुपो नेत्यर्थेन च प्रत्याख्यातम् ।

अदसोऽसेर्दादु दो मः ॥८॥२॥८०॥ "अनोस्रेरिति वाच्यम्" इति यथान्यासे एव लुप्तविभक्तिनिर्देशेन असेरिति बहुव्रीह्याश्रयणेन वा प्रत्याख्यातम् ।

एत ईद्बहुवचने ॥८॥२॥८१॥ "ईत्वं बहुवचनान्तस्य" इति सूत्रे अन्वर्थग्रहणेन प्रत्याख्यातम् ।

प्रत्यभिवादेऽशूद्रे ॥८॥२॥८३॥ "अशूद्रस्त्र्यसूयकेष्विति वाच्यम्" इत्यत्रासूयकग्रहणं प्रत्याख्यातम्, उपहासार्थमाक्षेपकासूयकस्य प्रत्यभिवादानर्हत्वात् । आशीर्वचनं हि प्रत्यभिवादो गृह्यते ।

गुरोरनृतोऽनन्त्यस्याप्येकैकस्य प्राचाम् ॥८॥२॥८६॥ "गुरोः प्लुतविधाने लघोरन्त्यस्य प्लुतप्रसङ्गोऽन्येन विहितत्वात्" इति न वाऽनन्त्यस्यापीति वचनमुभयनिर्देशार्थमिति प्रत्याख्यातम् ।

ये यज्ञकर्मणि ॥८॥२॥८८॥ इदं सूत्रं प्रत्याख्यातम्, ये यजामहे इति शब्दस्य डूह्यादिषु पाठात् ।

अग्नीत्प्रेषणे परस्य च ॥८॥२॥९२॥ "ओश्रावयाश्रावयोः परस्य चेति वाच्यं बहुलमन्यत्रापीति वाच्यम्" इति अग्नीत्प्रेषणे परस्य च विभाषा, ततः पृष्टेति योगविभागेन प्रत्याख्यातम् ।

तयोर्य्वावचि संहितायाम् ॥८।२।१०८॥ अत्र तयोरिति प्रत्याख्यातम् । अनुवृत्त्येष्टसिद्धेः । सूत्रेणैव सिद्धे प्लुतपूर्वस्य यणादेशो दीर्घशाकलप्रतिषेधार्थमिति प्रत्याख्यातम् ।

समः सुटि ॥८।३।५॥ संपुंकानां सत्वं वक्तव्यम्''इति समः स्सुटीति द्विसकारकनिर्देशेन प्रत्याख्यातम् ।

ढो ढे लोपः ॥८।३।१३॥ अत्रापदान्तग्रहणं, ष्टुत्वस्य सिद्धत्वं वा, सद्ग्रहणं वेति कुतश्चिदानन्तर्याश्रयणेन प्रत्याख्यातम् ।

खरवसानयोर्विसर्जनीयः ॥८।३।१५॥ "विसर्जनीयोऽनुत्तरपदे" इति "न वा बहिरङ्गलक्षणत्वात्"इति प्रत्याख्यातम् । यथा तु भाष्यं तथा वचनमेवावश्यकम् ।

भोभगोअघोअपूर्वस्य योऽशि ॥८।३।१७॥ अश्ग्रहणमनर्थकमन्यत्राऽभावादित्यश्ग्रहणं प्रत्याख्यातम् । उत्तरार्थं तर्हीत्यादि भाष्यंत्वेकदेश्युक्तिः ।

ङमो ह्रस्वादचि ङमुण् नित्यम् ॥८।३।३२॥ "ङमुटि पदादिग्रहणं कर्त्तव्यम" इति ङमन्तस्य पदस्य ह्रस्वात्परो यो ङम् तस्य ङमुड् भवतीत्यर्थेन प्रत्याख्यातम् ।

कुप्वोः ≍क≍पौ च ॥८।३।३७॥ "अत्र सस्येति वाच्यम्" इति कुप्वोः ततः ≍क≍पाविति योगविभागेन, "शर्परे विसर्जनीयः" इत्यस्य कुप्वोः≍क≍पौचेत्यत्रानुवृत्त्या वा प्रत्याख्यातम् ।

सोऽपदादौ ॥८।३।३८॥ "उपध्मानीयस्य च सत्वं वाच्यम्" इति उद्जेर्दोपधत्वेन प्रत्याख्यातम् । "असिद्धे भ उब्जेः" इति भुजन्युब्जाविति निपातनेन प्रत्याख्यातम् ।

इदुदुपधस्य चाऽप्रत्ययस्य ॥८।३।४१॥ "पुम्मुहुसोः प्रतिषेधः" इत्यत्र संपुंकानामिति वचनात्पुंसः प्रतिषेधः प्रत्याख्येयः । "वृद्धिभूतानां षत्वं वाच्यम्" इति न वा बहिरङ्गलक्षणत्वादिति प्रत्याख्यातम् ।

द्विस्त्रिश्चतुरिति कृत्वोऽर्थे ॥८।३।४३॥ अत्र द्वित्रिचतुर्ग्रहणं प्रत्याख्यातम् इदुदुपधस्येत्यनुवृत्त्या सिद्धत्वात् । "कृत्वोर्थे" इति तु विसर्जनीयान्तपदविशेषणम् ।

नित्यं समासेऽनुत्तरपदस्थस्य ॥८।३।४५॥ इदं सूत्रं समासे उत्तरपदस्थस्य सस्य षत्वनिवृत्त्यर्थमिति नित्यग्रहणं प्रत्याख्यातप्रायम् ।

अपदान्तस्य मूर्द्धन्यः ॥८।३।५५॥ अत्र मूर्धन्यग्रहणेन पदान्तस्येति सूत्रं प्रत्याख्यातम् ।

नुम्विसर्जनीयशर्व्यवायेऽपि ॥८।३।५८॥ "निसेः प्रतिषेधः" इति योगविभागेन, प्रत्येकं व्यवायशब्दपरिसमाप्त्या वा प्रत्याख्यातम् ।

आदेशप्रत्यययोः ॥८।३।५९॥ "सरगादीनां प्रतिषेधः" इत्युणादीनामव्युत्पन्नत्वात्प्रत्याख्यातम् । सर्पिषा यजुषेत्यादौ तु बहुलवचनात्षत्वसिद्धिः ।

उपसर्गात्सुनोतिसुवतिस्यतिस्तौतिस्तोभतिस्थासेनयसेधसिचसञ्जस्वञ्जाम् ॥८॥३॥६५॥ "निस उपसंख्यानमनिणन्तत्वात्" इति सुनोत्याद्युपसर्गस्थादिणः परस्यार्थो तदवयवस्य सस्य ष इत्यर्थेन प्रत्याख्यातम्। "ण्यन्तानां चोपसंख्यानम्" इति "न वाऽवयवस्यानन्यत्वात्" इति प्रत्याख्यातम्। "नामधातोश्च प्रतिषेधः" इति न वाऽनुपसर्गत्वात्" इति प्रत्याख्यातम्।

अग्नेः स्तुत्स्तोमसोमाः ॥८॥३॥८२॥ "अग्नेर्दीर्घात्सोमस्येति वाच्यम्" इति गौणमुख्यन्यायेन प्रत्याख्यातम्।

मातुः पितुर्भ्यामन्यतरस्याम् ॥८॥३॥८५॥ "सान्ताभ्यां चेति वाच्यम्" इत्येकदेशविकृतन्यायेन प्रत्याख्यातम्।

कपिष्ठलो गोत्रे ॥८॥३॥९१॥ "कपिष्ठलो गोत्रप्रकृताविति वाच्यम्" इति गोत्रे थः कपिष्ठलशब्द इत्यर्थेन प्रत्याख्यातम्।

स्तुतस्तोमयोश्छन्दसि ॥८॥३॥१०५॥ अत्र स्तुतस्तोमग्रहणं प्रत्याख्यातम्, पूर्वपदादिति सिद्धत्वात्। तत्र पूर्वपदशब्दो यौगिकः। छन्दोग्रहणं तूत्तरार्थं कर्त्तव्यम्।

रषाभ्यां नो णः समानपदे ॥८॥४॥१॥ "ऋकारग्रहणं कर्त्तव्यम्" इति व्यवायेपीति योगविभागेन, छन्दस्यृदवेत्यत्र योगविभागेन वा, क्षुभ्नादिषु नृनमनशब्दस्य, तृप्नोतिशब्दस्य वा पाठाज्ज्ञापकाद्वा प्रत्याख्यातम्। "नुम्व्यवाये णत्वेऽनुस्वाराऽभावे प्रतिषेधः" इति सौत्रं नुम्ग्रहणं च अयोगवाहानामट्सु पाठेन प्रत्याख्यातम्।

पूर्वपदात् संज्ञायामगः ॥८॥४॥३॥ "उत्तरपदग्रहणं कर्त्तव्यं, तद्धितपूर्वपदस्थाऽप्रतिषेधार्थम्" इति पूर्वपदेनाक्षेपेण लाभात्प्रत्याख्यातम्। अग इत्यपि प्रत्याख्यातम्। अणृगयनादिभ्य इति निपातनेन सिद्धे।

अह्नोऽदन्तात् ॥८॥४॥७॥ "अदन्तस्येति वाच्यम्" इत्यह्न इति प्रथमान्तत्वेन, दीर्घाह्नीत्यस्य युवादिपाठेन वा प्रत्याख्यातम्।

हिनुमीना ॥८॥४॥१५॥ "विकृतस्योपसंख्यानम्" इत्यचः स्थानिवत्वेन प्रत्याख्यातम्।

आनि लोट् ॥८॥४॥१६॥ लोड्ग्रहणं प्रत्याख्यातम्। अनर्थकत्वात्, अनुपसर्गत्वाद्वाऽनतिव्याप्तेः।

१—सुनोत्याद्युपसर्गस्थात् अर्थात् सुनोत्यादिसम्बन्ध्युपसर्गस्थात्।

२—तदवयवस्य अर्थात् सुनोत्याद्यवयवस्य। महाभाष्ये तु "इण उत्तरस्य सकारस्य, स चेदिणुपसर्गस्य, स चेत् सकारः सुनोत्यादीनाम्" इति सुगमः सुन्दरश्च पाठः अत्र पुस्तके तु संदिग्धप्रायः।

नेर्गदनदपतपदघुमास्यतिहन्तियातिवातिद्रातिप्सातिवपतिवहतिशाम्यतिचिनोतिदेग्धिषु च ॥ "अटा आङा च व्यवाये उपसंख्यानम्" इति । अट्कुप्वाङित्यनुवृत्त्या प्रत्याख्यातम् ।

हन्तेरत्पूर्वस्य ॥८॥४॥२२॥ "कुव्यवाये हादेशे" इत्याश्रित्यात्पूर्वस्येति प्रत्याख्यातम्।

उपसर्गादनोत्परः ॥८॥४॥२८॥ बहुलमिति पाठमाश्रित्य "अनोत्परः" इति प्रत्याख्यातम् ।

णेर्विभाषा ॥८॥४॥३०॥ "साधनव्यवाये उपसंख्यानम्" इति विहितविशेषणेन "अड्व्यवाये" इत्यनुवृत्त्या वा प्रत्याख्यातम् ।

षात्पदान्तात् ॥८॥४॥३५॥ "षात्पदादिपरवचनम्" इति पदेऽन्तः पदान्त इति व्याख्यानेन प्रत्याख्यातम् ।

नशेः षान्तस्य ॥८॥४॥३६॥ "नशेरश इति वक्तव्यम्" इति अन्तग्रहणं भूतपूर्वप्रतिपत्त्यर्थमिति प्रत्याख्यातम् ।

पदव्यवायेऽपि ॥८॥४॥३८॥ "अतद्धिते इति वक्तव्यम्" इति पदे व्यवायः पदव्यवाय इत्यर्थेन प्रत्याख्यातम् ।

अनचि च ॥८॥४॥४७॥ "अवसाने चेति वाच्यम्" इति प्रसज्यप्रतिषेधेन[1] प्रत्याख्यातम् ।

अ अ ॥८॥४॥६८॥ "अकारस्य प्रत्यापत्तौ दीर्घप्रतिषेधः" इति "सिद्धं तु तपरनिर्देशात्, एकशेषनिर्देशाद्वा स्वरानुनासिकभिन्नानां भगवतः पाणिनेः सिद्धम्"इति प्रत्याख्यातम् ।

॥ इति श्रीमत्कालेपाख्यनागोजोभट्टविरचितः प्रत्याख्यानसंग्रहः संपूर्णः ।

१—"नायं प्रसज्यप्रतिषेधः– अचि नेति । किं तर्हि ? पर्युदासोऽयं यदन्यदचः" इति भाष्यमस्य सूत्रस्यात्यन्तं भ्रामकमशुद्धं वा जातं लेखकप्रमादादिति प्रतीयते । यतः पर्युदासाश्रयणे वार्तिकस्य प्रत्याख्यानमेव भवितुं नार्हति । अत एव कैयटेनेत्थं पाठपरिवर्तनं व्यधायि "नायं पर्युदासो यदन्यदच इति । किं तर्हि—प्रसज्यप्रतिषेधोऽचि नेति" । उचितश्चायमेव पाठ इति सुधियो विभावयन्तु ।